नं० ६८१-च

महाभारते विष्णुसहस्रनामस्तोत्रम्
सविवरणम्

नं० ५८१-च

नं० ६८१ घ
[illegible]

नं० ६८१-घ

स॰टी॰
१

ॐ श्रीगणेशाय नमः श्रीगुरवे नमः ॥ सहस्रमूर्त्तेः पुरुषोत्तमस्य सहस्रनेत्राननपादबाहोः सहस्र
नाम्नां स्तवनं प्रशस्तं निरुच्यते जन्मजरादिशान्त्यै १ वैशम्पायन उवाच श्रीवैशम्पायनो जनमेजयं प्र
त्युवाच श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत १ धर्मा
नश्रुत्वेति सर्वसाधनानि हेतुभूतान् चोदनालक्षणानशेषेण कार्त्स्न्येन पावनानि पापक्षयकरा
णि सर्वशः सर्वप्रकारैः श्रुत्वा युधिष्ठिरो धर्मपुत्रः शान्तनवं शान्तनसुतं भीष्मं सकलपुरुषार्थसा
धनमल्पप्रयाससमनल्पफलं सुखसम्पाद्यमनुसन्धित्सुः पुनर्भूय एवाभ्यभाषत सम्यगुक्त
वान् युधिष्ठिर उवाच किमेकं दैवतं लोके किं वाप्येकं परायणम् स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मान
वाः शुभं २ किमेकं दैवतं देव इत्यर्थः स्वार्थे तद्धितविधानात् लोके लोकनहेतुभूते समस्तविद्या
स्थाने उक्तं प्रत्यर्थप्रश्नः किं वाप्येकं परायणं परमयनं प्राप्यं परायणं अस्मिंल्लोके एकं परायणं
णं च किं प्रदानयाः प्रवर्त्तते सर्वे भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि
तस्मिन्दृष्टे परावरे यस्य विज्ञानमात्रेणानन्दलक्षणमोक्षः प्राप्यते यद्विद्वानत्र विभक्तिकृतस्य
न यत्रा विष्णुस्मृतिर्विद्यते पुनर्भवस्य वेदनान्तरेव भवति यद्विद्वायापरः अयानरणा नास्ति तदुक्तं

वेदविधिश्रुतिपातनामणिपातपरिग्र सरेवादिभिः ४

श्रुतानि वेदाश्चत्वारो मीमांसान्यायविस्तरः पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दशेति ८

मेकं परायणं च लोके प्रज्ञायिष्यति द्वितीयप्रश्नः । कं कंतमं देवं स्तुवंतः गुणसंकीर्तनं कुर्वंतः कमर्चं
तः बाह्याभ्यंतरं चार्चनं बहुविधं कुर्वंतो मानवा मनुष्यताः शुभं कल्याणं स्वर्गापवर्गादिफल
प्राप्नुयुर्लभेयुरिति पुनः प्रश्नद्वयं २ को धर्मः सर्वधर्माणां भवतः परमो मतः किं जपन्मुच्य
ते जंतुर्जन्मसंसारबंधनात् २ को धर्मः पूर्वोक्तलक्षणः सर्वेषां धर्माणां मध्ये भवतः परमः प्रकृष्टो
मतो ऽभिमत इत्यर्थः इति पंचमप्रश्नः किं जपन् जपमुच्चैरुपांशुमानसलक्षणं जपनं कुर्वन्
जंतुर्जननधर्मा प्राणी अनेन तु जंतुशब्देन जपार्चनस्तवनादिषु यथायोग्यं सर्वप्राणिनामधिकार
विलिखितानां सूचयति जन्मसंसारबंधनात् जन्म अज्ञानविजृंभितानामविद्याकार्याणामुपलक्षणं संसा
रः अविद्यातत्कार्यजन्मसंसाराभ्यां यद्बंधनं तस्मान्मुच्यते मुक्तो भवतीति षष्ठः प्रश्नः जन्मसंसार
बंधनादिति तीदमुपलक्षणमितरेषां फलानामपि एतद्ग्रहणं मोक्षस्य प्रधानत्वख्यापनार्थं २ भी
ष्म उवाच जगत्प्रभुं देवदेवमनंतं पुरुषोत्तमं स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ४ स
र्वेषां शरणं भयदे जंतुः भीष्मो मोक्षधर्मादीनां प्रवक्ता सर्वज्ञः पाश्चात्त्यानेन राजप्रविशेषस्य
प्रश्नो ऽनेनेन श्लोकेन परिहियते जगतां जंगमानामात्मकेन तत्प्रभुः स्वामी तं देवदेवं देवानां देवमनं
जंगमाः

तं देशतः कालतो वस्तुतश्चापरिच्छिन्नं पुरुषोत्तमं क्षराक्षराभ्यां कार्यकारणाभ्यामन्यत्वात् एवं नामसहस्रेण
नाम्नां सहस्रेण स्तुवन् गुणान् संकीर्तयन् सततोत्थितः निरन्तरमुद्युक्तः पुरुषः पूर्णत्वात् पुरिशया
नाद्वा पुरुषः सर्वदुःखातिगो भवेदिति सर्वत्र संबध्यते ४ उत्तरश्लोकेन चतुर्थः प्रश्नः समाधीयते
तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययं ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव च ५ तमेव चार्चय
न्नाराधयन् कुर्वन्नित्यं सर्वेषु कालेषु भक्तिर्भजनेनात्पर्येन या पुरुषमव्ययं विनाशविक्रियारहितं
ध्यायंश्चाभ्यन्तरार्चनं कुर्वन् स्तुवन् पूर्वोक्तेन नमस्यन्नमस्कारं कुर्वन् एजाशेषभूतमभयं स्तुतिन
मस्कारलक्षणैर्यजमानः पूजकः फलभोक्ता अथवार्चयन्नित्यं तेनोभयविधमर्चयन्नुच्यते
ध्यायन्स्तुवन्नमस्यन्निति मानसवाचिककायिकैश्चोच्यते ५ तृतीयप्रश्नं परिहरति उत्तरैस्त्रिभिः
पादैः अनादिनिधनं विष्णुं सर्वलोकमहेश्वरं लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत्
६ अनादिनिधनं षड्भावविकारवर्जितं विष्णुं व्यापनशीलं सर्वस्य लोकान इति लोको हस्य
वर्गस्तस्य नियन्तॄणां ब्रह्मादीनामपीश्वरत्वात्सर्वलोकमहेश्वरस्तं लोकं हृष्यपवर्गं स्वाभाविके
न बोधेन साक्षात्पश्यतीति लोकाध्यक्षस्तं स्तुवन्निरन्तरं स्तुवन्सर्वदुःखातिगो भवेत् इति चयः २

णांसाधारणंफलवचनंसर्वाण्याध्यात्मिकादीनिदुःखान्यतीत्यगच्छतीतिसर्वदुःखातिगोभवेत्स्यात्
६ पुनरपितमेवस्तौतिविशिनष्टि ब्रह्मण्यंसर्वधर्मज्ञंलोकानांकीर्तिवर्द्धनं लोकनाथंमहद्भूतं
सर्वभूतभवोद्भवं ७ ब्रह्मण्यंब्रह्मणेस्रष्टेब्राह्मणायश्रुतयेतपसेवाहितं सर्वान्धर्मान्जाना
तीतिसर्वधर्मज्ञस्तंलोकानांप्राणिनांकीर्तिंयशःस्वशक्त्यनुप्रवेशेनवर्द्धयतीतितं लोके
नार्च्यतेयाच्यतेलोकानुपतपत्याशास्तेलोकानामीश्वरइतिवालोकनाथस्तं महद्भूतंमह
द्भूतंविद्यात्कर्षेणवर्तमानत्वात् भूतंपरमार्थंसत्यंस्वतःसिद्धंसर्वभूतानांभवःसंसारोय
स्मात्तस्मात्सकाशादुद्भवतीतिसर्वभूतभवोद्भवस्तं ७ पंचमःप्रश्नःपरिह्रियते एषमेसर्वधर्माणां
धर्मोऽधिकतमोमतः यद्भक्त्यापुण्डरीकाक्षंस्तवैरर्चेन्नरःसदा ८ सर्वेषांवेदलक्षणानांधर्मा
णामेषवक्ष्यमाणोधर्मोऽधिकतमोममसंमतोऽभिप्रेतः यद्भक्त्यातात्पर्येणपुण्डरीकाक्षंहृदयपुण्डरी
कसंकाशमानंवासुदेवंस्तवैर्गुणसंकीर्तनलक्षणैःस्तुतिभिःसदार्चयेन्नरःसत्कारपूर्वकम
र्चनंकरोतिनरोमनुष्यइतियदेषधर्मइतिसंबंधः अस्यस्तुतिलक्षणस्यार्चनस्याधिकत्वेकिं
कारणमुच्यते हिंसादिपुरुषान्तरद्रव्यान्तरदेशकालादिनियमानपेक्षत्वादधिककारण ।

स.टी. ध्यायन्कृतेयजन्यज्ञैस्त्रेतायांद्वापरेर्चयन्यदाप्नोतितदाप्नोतिकलौसंकीर्त्यकेशवमितिविष्णुपुराणव
२ चनेजपेनैवतुसंसिद्ध्येद्ब्राह्मणोनात्रसंशयः कुर्यादन्यन्नवाकुर्यान्मैत्रोब्राह्मणउच्यते इतिमानववं
3 चनेजपस्तुसर्वधर्मेभ्यः परमोधर्मउच्यते अहिंसयाचभूतानांजपयज्ञः प्रवर्तत इतिमहाभार
तेयज्ञानांजपयज्ञोस्मीतिभगवद्वचने एतत्सर्वमभिप्रेत्यैवमेसर्वधर्माणांधर्मोधिकतमोमतइ
त्युक्तं ॥ ८ ॥ द्वितीयप्रश्नंसमाधत्ते परमंयोमहत्तेजः परमंयोमहत्तपः परमंयोमहद्ब्रह्मपरमंयः
परायणं ॥ ९ ॥ परमंप्रकृष्टंमहद्बृहत्तेजश्चैतन्यलक्षणंसर्वावभासकं येनसूर्यस्तपतितेजसे
द्धस्तदेवज्योतिषांज्योतिः नतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांति कुतोयमग्निरित्यादि
श्रुतेः यदादित्यगतंतेजोजगद्भासयतेखिलमित्यादिस्मृतेश्च परमंतपः तपत्याज्ञापयतीति
तपः यश्चमेचलोकेपरेचलोकेसर्वाणिचभूतानियोंतरोयमयतीत्याद्यंतर्यामिब्राह्मणेसर्वनिय
न्तृत्वंश्रूयते भीषास्माद्वातः पवतेभीषोदेतिसूर्यः भीषास्मादग्निश्चेंद्रश्चमृत्युर्धावतिपंचमः
इत्यादितैत्तिरीयके तपतीष्टइतिवातपः अस्यैश्वर्यमनवच्छिन्नमितिमहत्त्वं परमंसत्यादिल
क्षणंपरंब्रह्म महत्तेनीयततयामहत्परमंप्रकृष्टंपरायणंपुनरावृत्तिशंकावर्जितं परमयहणं
२

त्सर्वज्ञस्यपरंतेजस्यादित्यादिकंयावर्त्तते योदेवःपरमंतेजःपरमंतपःपरमंब्रह्मपरमंपरायणं
स्यएकंपरायणमितिवाक्यार्थः ५ प्रथमप्रश्नस्योत्तरमाह. पवित्राणांपवित्रंयोमंगलानांच
मंगलं दैवतंदेवतानांचभूतानांयोऽव्ययःपिता १ पवित्राणांपावनानांतीर्थादीनांपरस्तुप्रमा
ण्यातोहृष्टः कीर्तनश्रवणतःस्मरणतःस्मृतःप्रणतःसर्वान्पापान्प्रक्षालयतीतिपरमंपवित्रंस
मारवंधहन्तृभूतेपुण्यापुण्यात्मकेकर्मतत्कारणंचाज्ञानंसर्वंनाशयतिस्वयथात्मज्ञानेनेति
वापरमंपवित्रंयन्नामकीर्तनमात्राद्विलापनमनुत्तमं मैत्रेयाशेषपापानांधातूनामिवपावकः
१ अवशेनापियन्नाम्निकीर्तितेसर्वपातकैः पुमान्विमुच्यतेसद्यःसिंहत्रस्तैर्मृगैरिव २ प्रायश्चि
त्तान्यशेषाणितपःकर्मात्मकानिवै यानितेषामशेषाणांकृष्णानुस्मरणंपरं ३ ध्यायेन्नारायं
णांदेवंस्नानादिषुचकर्मसु प्रायश्चित्तंहिसर्वस्यदुष्कृतस्येतिवैश्रुतिः ४ संसारसर्पसंदष्टनष्ट
चेष्टैकभेषजं कृष्णेतिवैष्णवंमंत्रंश्रुत्वामुक्तोभवेन्नरः ५ नित्यंसंचिंतयेद्देवंयोगयुक्तोजनार्द
ने मासरत्नापरामन्येकोहिनरस्यच्युताश्रय ६ रूपमारोग्यमर्थांश्चभोगांश्चैवानुषंगिकान द
दातिध्यायतांनित्यमपवर्गप्रदोहरिः ७ चिंत्यमानःसमस्तानांक्लेशानांहानिदोहरिः समस्त

सं॰
टी॰
४

ज्यागिविलं चात्मनोच्युतः किं न विंद्यते ८ गंगास्नानसहस्रेषु पुष्करस्नानकोटिषु यत्पापं विलयं या
ति स्मृते नश्यति तद्धरेः ९ मुहूर्तमपि यो ध्यायेन्नारायणमतंद्रितः सोपि स्वर्गमवाप्नोति किं पुनस्त स्वर्ग
त्परायणः १० एकस्मिन्नप्यतिक्रांते मुहूर्ते ध्यानवर्जिते दस्युभिर्मुषितेनेव युक्तमाक्रंदितं भृशं
११ जनार्दनं भूतपतिं जगद्गुरुं स्मरन्मनुष्यः सततं महामुने दुःखान्यशेषाण्यपहंति साधय
त्यशेषकार्याणि च यान्यभीप्सते १२ एवमेकाग्रचित्तः सन्संश्रितो मधुसूदने जन्ममृत्युजराग्रा
हं संसाराब्धिं तरिष्यति १३ यथाग्निरुद्धतशिखः कक्षं दहति सानिलः तथा चित्तस्थितो वि
ष्णुर्योगिनां सर्वकिल्बिषमित्यादिवचनात् १४ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षी
यंते चास्य कर्माणि तस्मिन्दृष्टे परावरे १५ इत्यादिश्रुतेश्च मंगलानां च मंगलं मंगलं सुखं तत्
साधनं तज्ज्ञापकं च तेषामपि परमानंदलक्षणं परमं मंगलमिति मंगलानां च मंगलं दैवतं दे
वतानां च देवानां देवो द्योतनादिभिः समुत्कर्षेण वर्तमानत्वात् भूतानां व्ययरहितः पिता जन
को यो देवः स एकं दैवतं लोके इति वाक्यार्थः एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांत
रात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च यो ब्रह्माणं विदधाति पूर्वं ४

यो वै वेदांश्च प्रहिणोति तस्मै तं देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्य इति श्वेताश्व
तराणां मंत्रोपनिषदि मयं देवैतेसत्न एकमेवाद्वितीयमिति छांदोग्ये ननु कथमेको देवो
जीवपरयोर्भेदात् न तत्सृष्ट्वा तदेवानुप्रविशत् स एष इह प्रविष्ट आनखाग्रेभ्य इत्यादि
श्रुतिभ्यो विभक्तस्य बुद्धितद्वृत्तिसाक्षित्वेन प्रवेशश्रवणाद्भेदः प्रविष्टानामितरेतरभेदात्
परानेकत्वमिति चेन्न एको देवो बहुधा सन्निविष्टः एकः सन्बहुधा विचचार त्वमेकोसि ब
हून्प्रविष्ट इत्येकस्यैव बहुधा प्रवेशश्रवणात् प्रविष्टानां परस्परेण भेदः हिरण्यगर्भ
इत्यष्टमेशाः एकस्मै देवायस्मैत्र एकारलोपेनैकदेवप्रतिपादकात्तैत्तिरीयके अग्निर्य
थैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो ब
हिश्च वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव एकस्तथा सर्वभूतान्तरात्मा रूपं रू
पं प्रतिरूपो बहिश्च सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः एकस्तथा
सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः एको वशी सर्वभूतान्तरात्मा एकं रूपं बहु
धा यः करोति तमात्मस्थं येनपश्यंति धीरास्तेषां सुखं शाश्वतं नेतरेषां नित्यानित्यानांचे

सं. ली. ५

5

तनो चेतनानां एको बहूनां यो विदधाति कामान् तमात्मस्थं येनुपश्यंति धीरास्तेषां शांति शाश्वती
नेतरेषामिति कठवल्लीषु ब्रह्म वा इदमग्र आसीत् एकमेव तदेकं सन्न व्यभवत् नान्योतोस्ति द्रष्टा
नान्योतोस्ति श्रोता नाइत्यादि बृहदारण्यके अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्शत् त
त्र को मोहः कः शोकः एकत्वमनुपश्यत इति ईशावास्ये सर्वे योभूत नानामानरः पुरुषः समस्ता
त्मेति विधात् आत्मा वा इदमेक एवाग्र आसीत् नान्यत्किंचन मिषत् एकं सद्विप्रा बहुधा वदंति
एकं संतं बहुधा कल्पयंति एको विममे त्रिभिरित्यादि एकोदधार भुवनानि विश्वा इत्यृग्वेदे स
देव सौम्येदमग्र आसीत् एकमेवाद्वितीयमिति छांदोग्ये सर्वभूतस्थितं यो मां भजत्येकत्वमा
स्थितः सर्वथा वर्तमानोपि स योगी मयि वर्तते विद्याविनयसंपन्ने अहमात्मा गुडाकेश सर्व
भूताशयस्थितः यदा भूतपृथग्भावमेकस्थमनुपश्यति तत एव च विस्तारं ब्रह्म संपद्य
ते तदा यथा प्रकाशयत्येकः कृत्स्नं प्रकाशयति भारत सर्वधर्मान्परित्यज्य मामेकं शरणं व्र
ज अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः इति भगवद्गीतासु हरिरेकः सदा ध्येयो भव
द्भिः सत्वसंस्थितैः ॐ मित्येवं सदा विप्राः पठध्वं ध्यात केशवं आश्चर्यं खलु देवानामेक।

लोकमिमं रविः क्षेत्रं क्षेत्री तथा कृत्स्नं २

५

त्वं पुरुषोत्तम धन्यस्त्वासि महाबाहो लोके नान्योस्ति कश्चिन्नेति हरिवंशो सृष्टिस्थित्यन्तकारिणीं ब्रह्म
विष्णुशिवात्मिकां स संज्ञां याति भगवानेक एव जनार्दनः तस्मात्त्वं विज्ञानमस्तेति किं चिन्ता चि
त्कदाचित द्विजवस्तुजातं विज्ञानमेकं निजकर्मभेदविभिन्नचित्तैर्बहुधाभ्युपेतं ज्ञानं विशुद्धं
विमलं विशोकमशेषलोभादिनिरस्तसंगं एकं सदैकः परमः परेशः स वासुदेवो न यतोन्यद
स्ति यदा समस्तं देहेषु पुमानेको व्यवस्थितः तदा हि को भवान्सोहमित्येतद्विफलं वचः सित
नीलादिभेदेन यथैकं दृश्यते नभः भ्रान्तदृष्टिभिरात्मापि तथैकः सन्पृथक्पृथक् एकः स
मस्तं यदिहास्ति किंचित्तदच्युतो नास्ति परं ततोन्यत् सोहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्य
ज भेदमोहं इतीरितस्तेन स राजवर्यस्तत्याज भेदं परमार्थदृष्टिः सकलमिदमहं च वासुदेवः पर
मपुमान्परमेश्वरः स एकः इति मतिरमला भवत्यनंते हृदयगते व्रजतां विहाय दूरात् यदा
वसुधा सर्वं सत्यमेव द्विवोकमः अहं भवो भवंतश्च सर्वे नारायणात्मकाः विभिन्नं पश्यतु यात्तस्य
तासामेव परस्परं आधिकान्तरनतावाध्यवाधकत्वेन वर्तन्ते भवानहं च विश्वात्मन्नेकमेव हि का
रणं जगतोस्य जगन्नार्थं भेदेनावां व्यवस्थितौ त्वया यदभयं दत्तं तदत्तमखिलं मया मत्तो विभि

डूत्

सं॰ दी॰ ६ 6

चामात्मानं कुर्वन्नार्हसि शोकं कर्तुं योऽहं स त्वं जगच्चेदं स देवासुरमानुषं अविद्यामोहितात्मानः पुरुषा भिन्न
दर्शिनः इति विष्णुपुराणे विष्णोरन्यं तु पश्यन्ति ये मां ब्रह्माणमेव च कुतर्कमतयो मूढाः पच्यन्ते नरके
ष्वधः ये च मूढा दुरात्मानो भिन्नं पश्यन्ति मां हरेः ब्रह्माणं च तथा तेषां ब्रह्महत्यासमं त्वघमिति
भविष्यत्पुराणे श्रीमहेश्वरवचनं तथा कैलासयात्रायां महेश्वरवचनं आदिस्त्वं सर्वभावानां मध्य
मन्तस्तथा भवान् त्वत्तः सर्वमभूद्विश्वं त्वयि सर्वं प्रलीयते अहं त्वं सर्वगो देव त्वमेवाहं जनार्द
न आवयोरन्तरं नास्ति शब्दैरर्थैर्जगत्पते नामानि तव गोविन्द यानि लोके महान्ति च तान्येव
मम नामानि नात्र कार्या विचारणा त्वदुपासा जगन्नाथ सैवास्तु मम गोपते यश्च त्वां द्वेषते।
गोपसमो ह्येति नसंशयः त्वद्विस्तरो यतो देव अहं भूतपतिस्ततः न तदस्ति विभो देव यत्ते विरहितं।
क्वचित् यदासीद्वर्तते यच्च यच्च भावि जगत्पते सर्वं त्वं देवदेवेश विना किंचित्त्वया न हि आत्मे
ति तूपगच्छन्ति ग्राहयन्ति च आत्मेत्येव शास्त्रोक्तविशेषणैः परमात्मा प्रतिपत्तव्यः तथा हि
परमात्मप्रक्रियायां जाबालाः आत्मत्वेनैवेनमभ्युपगच्छन्ति त्वं वा अहमस्मि भगवो देवते अहं
वै त्वमसि देवते इति तथान्येऽपि यदेवेह तदमुत्र यदमुत्र तदन्विह स यश्चायं पुरुषे यश्चा। ६

म्रः

मावादि त्वमेव एकस्तदात्मानमेवावेदहं ब्रह्मास्मीति तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमयमा
त्मा ब्रह्म सर्वा एष महानजः आत्माजरोमरोमृतोभयो ब्रह्मेत्येवमादय आत्मोपगमाद् इष्वाः
ग्राहयंति चात्मत्वेनैव स्वं रेवदांतवाक्यानि एष त आत्मा सर्वांतर एष त आत्मांतर्याम्य
मृतः यन्मनसा न मनुते येनाहुर्मनो मतं तदेव ब्रह्म त्वं विद्धि तत्सत्यमात्मा त्वमसीत्येवमादी
नि यत्तु प्रतीकदर्शनमिदं विष्णुप्रतिमान्यायेन भविष्यति तदयुक्तं गौणत्वप्रसंगाद्वाक्यवै
रूप्याच्च यदि हि प्रतीकदृष्टिरभिप्रेत्य ते स्यात् क्वचिदेव तत्र वचनं भवति यथा मनो ब्रह्मेत्यात्मादि इह
पुनस्त्वमहमस्म्यहं च त्वमसीत्याह अतः प्रतीकश्रुतिवैरूप्यादभेदप्रतिपत्तिः भेददृष्ट्यपवा
दाच्च तथा हि अथ योन्यां देवतामुपास्ते अन्योसावन्योहमस्मीति न स वेद यथा पशुः मृत्योः
स मृत्युमाप्नोति य इह नानेव पश्यति यथोदकं दुर्गे वृष्टं पर्वतादिषु विधावति एवं धर्मान् पृथ
क् पश्यंस्तानेवानुविधावति द्वितीयाद्वै भयं भवति यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते
अथ तस्य भयं भवति तत्त्वेव भयं मविदुषो मन्वानस्य सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेदेव
मायाभ्यसीः श्रुति भेददर्शनमपवदंति आत्मैवेदं सर्वं आत्मनि विज्ञाते सर्वमिदं विज्ञातं भ

स॰ टी॰
८

वति यदं सर्वं यदयमात्मा ब्रह्मैवेदं सर्वमिदं ब्रह्मेति श्रुतिः तथा स्मृतिरपि यज्ज्ञात्वा न पुनर्मोहमे
वं यास्यसि पाण्डव येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ते च ब्रह्मेत्युपैरेकत्वं सर्वोपनिषत्सु सि
द्धं द्रष्टव्यमित्यर्थः सर्वभूतेषु येनैकं भावमव्ययमीक्षते अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि
सात्त्विकमिति अद्वैतात्मज्ञानेन सम्यग्दर्शनमित्युक्तं भगवतापि तस्मादात्मन्येव सर्वे मनो दधी
त सिद्धार्थेपि वेदस्य प्रामाण्यमेष्टव्यं स्वपरसाधनादिभिरकार्यमेवेत्याह चेत्तथापरोपि वेदः
चेतनश्रुतेः परात्महं कृतं किमित्यपि युक्तं कृतं अन्यान्वितस्वार्थे पदानामसामर्थ्यं न कार्यान्वि
तस्वार्थे तथा सत्यर्थवादपदानामसामर्थ्ये प्रसंगाद्दत्र यद्वदुक्तः लिंगित्वाद्बहिर्भवति वायु
र्वै श्वेतमेवते पिष्ठा आलभेते नित्येनैवासेव प्रवर्त्तकत्वात् न नियोगस्येति तथा च श्रुतिः
अथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भ
वति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते तथा स्मृतिरपि अकामस्य क्रिया काचिद्दृ
श्यते नेह कस्यचित् यद्यद्धि कुरुते किंचित्तत्तत्कामस्य चेष्टितं न काम एष क्रोध एष इति च
अन्यपराणामपि मन्त्रार्थवादानां प्रामाण्यमंगीकर्तव्यं तेषां प्रामाण्यं कथनेनोरगत्व २

गतवान्नहुषः कथं च स पतत्तु परिभ्रंशितो नावाह्यमाना नाहुषात्मना देवर्षयो महाभागास्तथा ब्रह्मर्ष
यो मलाः पप्रच्छुः संशयं ते तु नहुषं पापचेतसं य इमे ब्रह्मणा प्रोक्ता मन्त्रा वै प्रोक्षणे गवां ए
ते प्रमाणं भवत उताहो नेति वासव नहुषो नेति तानाह तमसा मूढचेतनः ऋषय ऊचुः
अधर्मे संप्रवृत्तस्त्वं धर्मं विजिहास्यसि प्रमाणमेतदस्माकं पूर्वैः प्रोक्तं महर्षिभिः अगस्त्यु
वाच ततो विवदमानास्स ऋषिभिः सह पार्थिवः अथ मामस्पृशन्मूर्ध्नि पादेनाधर्मपीडि
तः तेनाभूद्धततेजाः स निःश्रीकश्च महीपतिः ततस्तमहं शापं शक्रमवोचं भयपीडितं य
स्मात्पूर्वैः कृतं मार्गं महर्षिभिरनुष्ठितं अदुष्टं दूषयसि वै यच्च मूर्ध्न्यस्पृशः पदा यच्चापि
त्वमृषीन्मूढ ब्रह्मकल्पान्दुरासदान् वाहान्कृत्वा वाहयसि तेन स्वर्गान्निपतिष्यसि ततः
पाप परिभ्रष्टः क्षीणपुण्यो महीतले दशवर्षसहस्राणि सर्परूपधरस्तथा विचरिष्यसि
भूपाल पुनः स्वर्गमवाप्स्यसि दृष्ट्वा युधिष्ठिरं नाम नववंशसमुद्भवं इति महाभारते अ
तः अद्वयपरमात्मज्ञानस्य अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप अप्राप्य मां निवर्तन्ते मृत्यु।
संसारवर्त्मनीति भगवतापुक्तं एतेन रूपकेन च एवं प्राप्तेन कर्मण्येन ह्यस्य एतस्मात्तस्मा

स्ना॰ दी॰ ८

त्वमस्मायेन्नन्यानीयात्र प्रयत्नाय त्वदेवेयेत्यायं स्तेयरावधूतः तदक्षरं षिणामज्ञाद्दानि स्तोत्रं तस्या
यमीपुरिनियात्वेनायमाः प्रजापतिस्तोत्रं न्याय मायस्तानी मानि व यात्विवेगाऽध्वगाधा स्वेर
पादाइतिस्मृतेर्वेणां न गायत्र्या न गाधायेषु धयस्य रपादाम्यपादः न यायाईशावास्ये आवि
हृत्रिंदार्थीमेतः असुर्या नाम ते लोका अन्धेन तमसावृताः तांस्ते प्रेत्याभिगच्छन्ति ये के चा
त्महनो जना इति तैत्तिरीयके च असन्नेव स भवति असद्ब्रह्मेति वेद चेदिति तथा शकु
न्तलोपाख्याने योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते किं तेन न कृतं पापं चोरेणात्मा
पहारिणा सहस्रनामजपस्नानं तु पस्नानमच्युते यस्मिन्वा अस्य वेदास्य पवित्रं क्रतवन्नमेक
तो ब्रजेन्नतु मानसे तीर्थं यस्मिन्स्नात्वा मनो भवेत् ज्ञानह्रदे ध्यानजले रागद्वेषमलाप
हे यः स्नाति मानसे तीर्थे स याति परमां गतिं आत्मानदी संयमतोयपूर्णा सत्यावहा
शीलतटा दयोर्मी न तत्राभिषेकं कुरु पाण्डुपुत्र न तु वारिणा शुद्ध्यति चान्तरात्मेति महाभार
ते मानसं स्नानं विष्णुचिन्तनमिति विष्णुस्मृतौ जपेनैव तु संसिद्ध्येद्ब्राह्मणो नात्र संशयः
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यत इति मानववचनं जपस्तु सर्वधर्मेभ्यः परमो धर्म

८

च्यते अहिंसया तु भक्तानां जपयज्ञः प्रवर्त्तते यज्ञानां जपयज्ञोऽस्मीति भगवद्वचने श्रीगी॰
सु अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः
१ यदेकदैवतं मङ्गलं तेन तस्याप्यलक्षणमुच्यते यतः सर्वाणि भूतानि भवन्त्यादियुगागमे
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ११ यतो यस्मात्सर्वाणि भूतानि भवन्त्युद्भवन्ति आदियुगा
गमे यस्मिंश्च प्रलयं यान्ति विनाशं गच्छन्ति पुनर्भूय एवं त्ववधारणार्थः नान्यस्मिन्नित्यर्थः
युगक्षये महाप्रलये चकारान्मध्येऽपि यस्मिंल्लीयन्ति यतो वा इमानि भूतानि जायन्ते यत्प्र यन्जातानि जीवंति
यन्त्यभिसंविशन्तीति श्रुतेः ॥ तस्य लोकप्रधानस्य जगन्नाथस्य भूपते विष्णोर्नामसहस्रं
मे शृणु पापभयापहं ११ तस्यैव लक्षणलक्षितस्यैकदैवतस्य लोकप्रधानस्य लोकान्तुभिः
प्रति प्राधान्यस्य जगन्नाथस्य भूपते युधिष्ठिर विष्णोर्व्यापनशीलस्य नाम्नां सहस्रं पापभयं
चापहन्तीति पापभयापहं मे मत्तः शृणु एकाग्रमना भूत्वावधारय १२ यानि नामानि गौ॰
णानि विख्यातानि महात्मनः ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये १३ एकस्य
वस्तुनस्तस्य ब्रह्मणो हि जन्मजन्मनाम्नां सहस्रलोकानामुपकारकरं शृणु निमित्तशाङ्क

सुटी॰ ५ 9

योनाम्नां भेदिनंस्तौति दीरणेन विभिन्नान्येवसाध्यन्तेफलानिद्विजसत्तम यद्वत्किनामयज्ञस्यतन्नसि
द्धेव वर्त्तते निसाधके पुरुषव्याघ्र सोमसंस्थेषु वर्त्तते इति श्रीविष्णुधर्मवचनात् यद्यपि परस्य ब्रह्म
णः षष्ठी गुणक्रियाजातिरूढीनां शब्दप्रवृत्तिहेतूनां निमित्त शब्दादीनां चासम्भवस्तथापि
परमात्मनो ब्रह्मणोपि सविकारे च सर्वात्मकत्वात् तेषां शब्दप्रवृत्तिहेतूनां संभवात् सर्वे शब्दाः परस्मि
न्नुमि वर्त्तन्ते यानि नामानि गौणानि गुणयोगात् प्रवृत्तानि तेषु यानि विख्यातानि प्रसिद्धानि
ऋषिभिर्मन्त्रद्रष्टृभिश्च परिगीतानि परितः समन्ततः परमेश्वराख्यानेषु तत्र तत्र गीतानि महा
त्मनो महात्मन इति यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह यच्चास्य संततो भावस्तस्मादात्मेति क
थ्यत इति वचनात् अयमेव महानात्मेति महात्मा तस्याचिन्त्यप्रभावस्य तानि वक्ष्यामि भूत
ये पुरुषार्थचतुष्टयसिद्धये पुरुषार्थचतुष्टयार्थिनामिति १२ ॐ विश्वं विष्णुर्वषट्कारो
भूतभव्यभवत्प्रभुः भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः १४ आदित्यादिशब्दानामर्थो
तरप्रसिद्धानां आदित्यादीनां तद्विभूतित्वेन तदभेदाज्ञस्यैव स्तुतिरिति प्रसिद्धार्थग्रह
णोपि स्तुतिरेव भूतात्मा चेत्युक्त्यात्मा च प्रधानात्मा नियामकत्वात् आत्मा च परात्मा च त्वमेकः पंच २

यत्र पुंलिंगशब्दप्रयोगस्तत्र विष्णुर्विशेष्यः यत्र स्त्रीलिंगशब्दप्रयोगस्तत्र देवता विशिष्यते ७

धास्थितः ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च नद्यः समुद्राश्च स एव सर्वं यद
स्ति यन्नास्ति च विप्रवर्येति विष्णुपुराणे आदित्यानामहं विष्णुरित्यारभ्य अथवा बहुनैतेन किं ज्ञाते
न तवार्जुन विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदित्यन्तेन श्रीगीतोपनिषत्सु भगवताप्यु
क्तं पृथगेव दैविश्वमिमादिश्रुतेश्च विश्वादिशब्दानां पुनरुक्तानामपि प्रवृत्तिभेदेनार्थभेदात्पौन
रुक्त्यं श्रीपतिर्माधव इत्यादीनामनेकत्वेपि शब्दभेदात्पुनरुक्तं अर्थैक्येपि न पुनरुक्तो न दोषो नाम्नां सह
स्रस्य किमेकं दैवतमिति इष्टैकदैवतनिर्णयत्वात् यत्र पुंलिंगशब्दप्रयोगस्तत्र विष्णुर्विशेष्यः
यत्र स्त्रीलिंगशब्दप्रयोगस्तत्र देवता वि[शि]ष्यते यत्र नपुंसकलिंगशब्दस्तत्र ब्रह्म विशेषणीयं प्रयोगात्
यतः सर्वाणि भूतानीत्यारभ्य जगदुत्पत्तिस्थितिलयकारणस्य ब्रह्मण एकदैवतत्वेनाभिहित
त्वात् आदावुभयविधं ब्रह्म विश्वशब्देनोच्यते विश्वस्य जगतः कारणत्वेन विश्वमित्युच्यते ब्रह्म
आदौ तु विश्वमिति कार्यशब्देन कारणग्रहणं कार्यभूतविरिंच्यादीनामभिरूपपन्नात्तन्निर्वि
शेषोऽर्थं निदर्शयितुं यद्वा परस्मात्पुरुषात्प्रभिन्नमिदं विश्वं परमार्थतस्तेन विश्वमित्यभिधीय
ते ब्रह्म अथवा विशतीति विश्वं ब्रह्म तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः किंच संहृतो विश

२५

सटी॰
१०

तिसर्वाणिभूतान्योमिति विश्वं ब्रह्म यत्प्रयन्त्यभिसंविशन्तीति श्रुतेः तथाहि सकलं जगत्कारणम्
तमशेषं विशन्तीति अत्राखिलं विशन्तीति उभयथा विश्वं ब्रह्मेति स्मृतेः अन्यत्र धर्मादन्यत्राधर्मा
दित्यादिश्रुत्या सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति यदिच्छन्तो ब्रह्मचर्यं चरन्ति त
त्ते पदं संग्रहेण ब्रवीम्योमित्येतत् एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परं एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छ
ति तस्य तत् एतद्वै सत्यकाम परमपरं च ब्रह्म यदोंकार इत्युपक्रम्य यः पुनरेतं त्रिमात्रेणोमित्येते
ओमितिदंस नैवाक्षरेण परं पुरुषमभिध्यायीत ओमितीदं सर्वं तद्यथा शंकुना सर्वाणि पर्णानि संतृण्णान्ये
र्वं वमोंकारेण सर्वा वाक्संतृण्णा ओमित्येतदक्षरमिदं सर्वमित्युपक्रम्य प्रणवो ह्यपरं ब्रह्म प्रणवश्च प
रः स्मृतः अपूर्वोऽनन्तरोऽबाह्योऽनपरः प्रणवोऽव्ययः सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च एवं हि प्रण
वं ज्ञात्वा व्यश्नुते तदनन्तरं प्रणवं हीश्वरं विद्यात्सर्वस्य हृदये स्थितं सर्वव्यापिनमोंकारं मत्वा धी
रो न शोचति अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः ओंकारो विदितो येन स मुनिर्नेतरो जन
इत्येतामाण्डूक्योपनिषत् ओं तद्ब्रह्म ओं तद्वायुः ओं तदात्मा ओं तत्सर्वं ओं तत्पुरोन्नमः इत्यादिस्मृतिभ्यः
ओमित्येकाक्षरं ब्रह्म रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः प्रणवः सर्ववेदेषु शब्दः खे पौरुषं

१२५

श्रा

रुषुगिराममममेकमक्षरं ओं यत्तत्परं ब्रह्म त्रयी यस्मिन्प्रतिष्ठिता एकाक्षरं परं ब्रह्म प्राणायामः परं
तपः ॐकारः स्वर्गद्वारं तस्माद्ब्रह्माध्येष्यमाण एतदादि प्रतिपद्येत विकर्माचान्याकृत्वा एवं
लौकिकावाचाव्यावर्तते प्रणवाद्यास्तथा वेदाः प्रणवे पर्यवस्थिताः वाङ्मयं प्रणवः सर्वं तस्मा
त्प्रणवमभ्यसेदित्यादिस्मृतिभ्यश्चविश्वशब्देनोंकारोऽभिधीयते सर्वं खल्विदं ब्रह्म तज्जलानि
ति शान्त उपासीतेति एतदुक्तं भवति यस्मात्सर्वमिदं विकारजातं ब्रह्म तज्जत्वात् तल्लत्वात्तदन
त्वाच्च न च सर्वस्यैकात्मत्वे रागादयः संभवन्ति तस्माच्छान्त उपासीतेति श्रुतेः श्रूयतां धर्मसर्वं
स्वं श्रुत्वा चैवावधार्यतां आत्मनः प्रतिकूलानि परेषां न समाचरेत् आत्मोपमेन सर्वत्र सम
पश्यति योऽर्जुन सुखं वा यदि वा दुःखं स योगी परमो मतः निर्गुणः परमात्मात्र देहं तेव्याप्य
तिष्ठति तमहं ज्ञानविज्ञेयं नावमन्तुं नलंघये यथागमैर्न्निविद्यन्त महाभूतभावनं क्रमेयत्नानि
रिंचमेहन्तमानिवमार्गर बहुवैराणि भूतानि द्वेषं कुर्वन्ति चेत्ततः शोच्यान्यहोतिमोहेन
व्याप्तानीति मनीषिणा एते भिन्नदृशां दैत्या विकल्पाः कथिता मया कृत्वाभ्युपगमं तत्र सं
क्षेपः श्रूयतां मम विस्तारः सर्वभूतस्य विष्णोः सर्वमिदं जगत् द्रष्टव्यमात्मवत्तस्मादभेदेन वि
व

स॰टी॰
११

वत्सलौः समुत्सृज्यामरंभावेनस्माद्यथावयं नयायत्नेकरिष्यामो यथायास्माननिर्वृतिं सर्वत्रदे
त्याः समतामृपेनसमताख्येपेनसमत्वमाराधनमच्युतस्य नमेत्रादिद्विजस्तातनचनैः सर्गिकोमम
प्रभावएषसौमान्योयस्ययस्याच्युतोहृदि अन्येषांयोनपापानिचिंतयत्यात्मनोयथा तस्यपापा
गमस्तातहेत्वभावान्नविद्यते कर्मणामनसावाचापरपीडांकरोतियः तद्बीजंजन्मफलतिप्रभू
तंतस्यचाशुभं सोहंनपापमिच्छामिनकरोमिवदामिवा चिंतयन्सर्वभूतस्थमात्मन्यपिचकेशवं
शारीरंमानसंवाग्जंदैवंवंभूतभवंतया सर्वत्रसमचित्तस्यमेजायतेकुतः एवंसर्वेषुभूतेषुभक्तिरव्य तस्य
भिचारिणी कर्तव्यापण्डितैर्ज्ञात्वासर्वभूतमयंहरिं तासमचोपमहानेचभेदंदंडोनयथापरो ऽपायाः
काधितादैतेमित्रादीनांचसाधने तानेवाहंनपश्यामि मित्रादीस्तातममाकुधः साध्याभावेमहाबा
हो साधनैः किंप्रयोजनं सर्वभूतात्मकेतातजगन्नाथेजगन्मये परमात्मनिगोविंदेमित्रामि
त्रकथाकुतः जडानामविवेकानाममराणामपिप्रभो भाग्यभोग्यानिराज्यादिसन्तनीतिम
तामपि तस्माद्यतेतपुण्येषुयरछन्महतीश्रियं यतितव्यंसमत्वेननिर्वाणमपिचेछता देवामनु
ष्याःपशवःपक्षिवृक्षसरीसृपाः रूपमेतदनंतस्यविष्णोर्भिन्नमिवस्थितं एतद्विजानतासर्वं

११

गत्स्थावरजंगमे इत्येवमात्मवद्दृष्टिस्सर्वतीयं विश्वरूपधृक् एवंज्ञाते सभगवाननादिः परमे
श्वरः प्रसीदत्यच्युतस्तस्मिन्प्रसन्ने क्लेशसंक्षयः बहूनांजन्मनामंते ज्ञानवान्मांप्रपद्यते वासु
देवः सर्वमिति समहात्मा सुदुर्लभ इत्यादिवचनेभ्यश्च हिंसादिरहितेन स्तुतिनमस्कारादि
कर्तव्यमिति दर्शयित्वा विश्वशब्देन ब्रह्माभिधीयते इतिवा मत्कर्मकृन्मत्परमो मद्भक्तः संग
वर्जितः निर्वैरः सर्वभूतेषु यः समामेति पांडवेति नचलति निजवर्णधर्मतो यः सममति
रात्मसुहृद्विपक्षपक्षे नहरति नचहंति किंचिदुच्चैस्सितमनसं तमवेहि विष्णुभक्तं विमल
मतिरमत्सरः प्रशांतः शुचिचरितोखिलसत्वमित्रभूतः प्रियहितवचनोस्तमानमायो वस नर्मद
तिसदाहृदितस्यवासुदेवः सकलमिदमहंचवासुदेवः परमपुमान्परमेश्वरः सएकः इतिम
तिरचलाभवत्यनंते हृदयगते व्रजतान्विहाय दूरात् यमनियमविधूतकल्मषाणामनुदि
नमच्युतसक्तमानसानामपगतमदमानमत्सराणां व्रजभट दूरतरेण मानवानामित्यादि
वचनैर्वैष्णवलक्षणस्यैव प्रकारत्वाच्च हिंसादिरहितेन विष्णोः स्तुतिनमस्कारादिकर्तव्यमि
ति अह्रयादयेनाम्रह्रयादयं प्रह्रयाभिः समभिहृत इत्यादिश्रुतेः अश्रोत्रियं श्राद्धमधीतम

व्रतमदक्षिणं यज्ञमस्तु त्विजात्कृते अश्रद्धयादत्तमसंस्कृतं हविर्भागाः षडेते न वदेत्स सत्तम पु
ण्यं महत्स्वेषणं यज्ञमन्त्रमहेषिणां तथा क्रयविक्रयसक्तानां पुण्यं यज्ञाग्निहोत्रिणां अश्रद्धया
चयदानं यज्ञतो दत्तं तां तथा तत्सर्वं न वदेत्तैरु मत्प्रसादाद्भविष्यति अश्रद्धयाहुतं दत्तं तपस्त
प्तं कृतं च यत् असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह न्यायादिस्मृतिभाष्य श्रद्धयैव स्तुतिनमस्का
रादिकर्तव्यो ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः इति भगवद्वचनात् स्तुतिनमस्का
रादिकं कर्म सात्विकं विगुणमपि श्रद्धापूर्वकं ब्रह्मणोऽभिधानत्रयप्रयोगेन सगुणं सात्वि
कं संपादितं भवति आत्मानं विस्मृत्य ध्यात्वा स्तुतिनमस्कारादिकर्तव्यं नाविष्णुः कीर्तयेद्विष्णु
नाविष्णुर्विष्णुमर्चयेत् नाविष्णुः संस्मरेद्विष्णुं नाविष्णुर्विष्णुमाप्नुयादिति महाभारते कर्मकांडे
सर्वाणि तानि नामानि परस्य ब्रह्मणो न च सर्वान्कामानवाप्नोति समाराध्य जगद्गुरुं तन्मा
यत्वेन गोविंदमित्यतः स्नात्म्य नान्यथा तन्मयो वांछितान्कामानवाप्नोति मानव इति
विष्णुधर्मे सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः सर्वथा वर्तमानोऽपि स योगी मयि वर्त
ते इति भगवद्गीतासु अहं हरिः सर्वमिदं जनार्दनो नान्यत्ततः कारणकार्यजातं ईदृङ्म

नोपसन्नेन नस्यभयो भवेद्दिवा हि हृदशगामी भवंतीति विष्णुपुराणे गरुडोर्यत्र यत्र वादो निंदा वापि प्रवर्त-
ते कर्णौ तत्र पिधाय नेयो गंतव्यं वा ततोऽन्यतः तस्माद्ब्रह्मवाचर्यत्र पापं भवति ब्रूतीति व्यासस्मृतेः
वरं हुतवहज्वालापंजरांतर्व्यवस्थितिः नशौरिचिंताविमुखजनसंवासवैशसम् इति का-
त्यायनवचनात् यत्र देशे वासुदेवनिंदा तत्र वासो न कर्तव्यः एतद्धर्मो भवति यस्मादेव पराभ-
क्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन इति श्वेताश्वतरोपनिष-
त्सु वर्णितं हरौ गुरौ च परा भक्तिः कार्येति एवं विष्णोऽपि यन्नामकीर्तने सर्वपातकैः प्रमा-
विमुच्यते नरः सिंहत्रस्तैर्मृगैरिव जानतोऽजानतो वापि वासुदेवस्य कीर्तनात् तत्सर्वं वि-
लयं याति तोयस्थं लवणं यथा कलिकल्मषमत्युग्रं नरकार्तिप्रदं नृणाम् प्रयाति विलयं सद्यः
ह्ले सकृद्यत्राभिसंस्मृते सकृत्स्मृतोऽपि गोविन्दो नृणां जन्मशतैः कृतम् पापराशिं दहत्याशु तूलरा-
शिमिवानलः सकृदुच्चरितं येन हरिरित्यक्षरद्वयं बद्धः परिकरस्तेन मोक्षाय गमनं प्रति
एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः दशाश्वमेधी पुनरेति जन्म कृष्ण-
प्रणामी न पुनर्भवाय इत्यादिवचनैः अहो भक्तोऽर भावेऽपि नामसंकीर्तनं समस्तं हरिनना

स·टी·
१२
13

शयतीतिमंतव्यं किंस्वित्सहस्रनामसंकीर्तनेसमस्तदुरितंनाशयतीति मनसावाग्रेसंकल्प
नयवाचाव्याहरति यद्धेमनसाध्यायतितद्वाचावदतीतिश्रुतिभ्यांस्मरणध्यानेचनामसंकी
र्तनेंतर्भूते यस्मिन्न्यस्तमतिर्नयातिनरकंस्वर्गोपियच्चिंतने विघ्नोयत्रनिवेशितात्ममनसो
ब्राह्मोपिलोकोल्पकः सम्यक् चेतसियःस्थितोमलधियांपुंसांददात्यव्ययः किंचित्रंयदघं
प्रयातिविलयंतत्राच्युतेकीर्तितइतिविष्णुपुराणेतःश्रीपराशरेणोपसंहृते आलोड्य
सर्वशास्त्राणिविचार्यचपुनःपुनः इदमेकंसुनिष्पन्नंध्येयोनारायणःसदा इतिमहा
भारतांतेभगवताश्रीवेदव्यासेनोपसंहृते हरिरेकोसदाध्येयोभवद्भिःसत्वसंस्थितैः ॐ
मित्येवंसदाविप्राःपठध्वंध्यातकेशवमितिहरिवंशे एतत्सर्वमभिप्रेत्यैवमस्मसर्वधर्माणां
धर्मोधिकतमोमतइत्याधिकामस्य किमेकंदैवतंलोकेकिंवाप्येकंपरायणं यतःस
र्वाणिभूतानीतिपद्यस्योक्तंतद्भिन्नशब्देनोक्तमितिव्याख्याने १ नहिकमित्याकांक्षायां
माहविष्णुरिति अस्यज्ञानंतोनामचिद्विविक्तनमहस्तेविष्णोस्समतिंभजामहइत्यादिश्रु
तेर्विष्णोर्नामसंकीर्तनेसम्यग्ज्ञानप्राप्तयेविहितेवेवेष्टिव्याप्नोतिविष्णुःविषधातोर्व्या

प्रत्यय

विष्णुरिति देशकालवस्तुपरिच्छेदशून्य इत्यर्थः अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इति व्याप्तिश्रुतेः वि
शतेर्वा क्नुयान्तस्य रूपं १

समभिधायिनः नृस्तयोतस्माद्रूपं व्याप्य मे रोदसी पार्थ कान्तिश्चाभ्यधिका स्थिता क्रमणाद्वा
प्यहं पार्थ विष्णुरित्यभिसंज्ञितः इति महाभारते २ यदुद्देशेन वषट्क्रिया स वषट्का
रः यस्मिन्यज्ञे वा वषट्क्रिया स वषट्कारो यज्ञः यज्ञो वै विष्णुरिति श्रुतेः वषट्कारादि
मन्त्रात्मना देवान् प्रीणयति इति वा वषट्कारः देवता वा प्रजापतिश्चेति श्रुतेः ३ भूतञ्च
भव्यञ्च भवच्चेति भूतभव्यभवन्ति तेषां प्रभुर्भूतभव्यभवत्प्रभुः कालभेदमनादृत्य सन्मात्र
प्रतियोगिकमैश्वर्यमस्येति प्रभुत्वं ४ रजोगुणं समाश्रित्य विरिञ्चिरूपेण भूतानि क
रोतीति भूतकृत् कथ्यते हरिः तमोगुणमधिष्ठाय रुद्रात्मना भूतानि निकृन्तति कृणोति
हिनस्तीति वा भूतकृज्जयः ५ सत्त्वगुणमधिष्ठाय भूतानि बिभर्ति धारयति पोषयती।
ति वा भूतभृत् ६ प्रपञ्चरूपेण भवतीति केवलं भवत्येव वा भावः भवनं भावः सत्तात्मको वा
७ भूतानामात्मान्तर्यामीति भूतात्मा एष त आत्मान्तर्यामीति श्रुतेः ८ भूतानि भावयती
ति जनयति वर्द्धयतीति वा भूतभावनः ९ ।४ भूतकृतादिभिर्गुणैस्तत्त्वं प्रामाण्येन निषि
ध्यते पूतात्मा परमात्मा च मुक्तानां परमा गतिः अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥

15

पूत आत्मा यस्येति इत्यात्मा केवलो निर्गुणश्चेति श्रुतेः गुणोपरागस्तु स्वेच्छातः पुरुषस्य कल्प्यते।
परश्चासावात्मा च परमात्मा कार्यकारणविलक्षणो नित्यशुद्धबुद्धमुक्तस्वभावः ११ मुक्तानां
परमा उत्कृष्टा गतिर्गन्तव्या देवता पुनरावृत्त्यसम्भवाद्गन्तस्येति मुक्तानां परमा गतिः १२ नास्य
व्ययो नाशो विकारो वा विद्यत इत्यव्ययः अजरोमरोव्यय इत्यादिश्रुतेः १३ अस्तेर्व्यत्ययेनास्ताह
र्योगिनः आसीत्पुरा एवमेवेति विग्रहं कृत्वा व्युत्पादितः पुरुषः पूर्वमेवाहमिहासमिति त
त्पुरुषस्य पुरुषत्वमिति श्रुतेः अथवा पुरुषु पुरीषु उत्कर्षशालिषु सत्त्वेषु एव सीदतीति वा पुरू
णि बहूनि फलानि मनोभिलषितानि सनोतीति ददातीति वा पुरू नि भुवनानि संहारसमये स्य
तीत्यन्तं करोतीति वा पूरणात्सदनाद्वापि पुरुषः पूरणात्सदनाच्चैव ततोसौ पुरुषो मत इति
पंचमवेदे १४ साक्षादव्यवधानेन स्वरूपबोधेन पश्यति सर्वमिति साक्षी साक्षाद्द्रष्टरि सं
ज्ञायामिति पाणिनिवचनादिन्प्रत्ययः १५ क्षेत्रं शरीरं जानातीति क्षेत्रज्ञः आतोनुपसर्गेक
इति कः प्रत्ययः क्षेत्रज्ञं चापि मां विद्धीति भगवद्वचनात् १६ स एव न क्षरतीत्यक्षरः परमात्मा
अश्नुतेर्वा सरप्रत्ययान्तस्य रूपमक्षर इति एवकारात्क्षेत्रज्ञाक्षरयोरभेदः परमार्थः चकारा

व्यावहारिकोभेदः प्रसिद्धेरप्रमाणत्वात् १० १५ योगोयोगविदांनेताप्रधानपुरुषेश्वरः नारसिंहवपुः
श्रीमान्केशवःपुरुषोत्तमः १६ ज्ञानेन्द्रियाणिसर्वाणिनिरुद्ध्यमनसासह एकत्वभावनायोगः
क्षेत्रज्ञपरमात्मनोस्तद्वाप्यतयायोगः १८ योगंविदंतिलभंतइतियोगविदस्तेषांनेताज्ञाति
नायोगक्षेमवहनादिनेतियोगविदांनेता १९ प्रधानंप्रकृतिर्मायापुरुषोजीवस्तयोरीश्वरः
प्रधानपुरुषेश्वरः २० नरस्यसिंहस्यचावयवायस्मिंल्लक्ष्यंतेतद्वपुर्यस्यसनारसिंहवपुः
२१ यस्यवक्षसिनित्यंवसतिश्रीःसश्रीमान् २२ अभिरूपाःकेशायस्यसकेशवः कश्चअश्च
ईशश्चकेशास्त्रिमूर्तयस्तेवशेवर्तंतेयस्यसवाकेशवः केशिवधाद्वाकेशवः इत्यादराद्दि
त्वाद्वत्साधुत्वकल्पना २३ पुरुषाणामुत्तमःपुरुषोत्तमः अत्रनन्निर्द्धारणइतिषष्ठीसमा
सप्रतिषेधोनभवति जात्याद्यनपेक्षयासामर्थ्यात् यत्रपुनर्जातिगुणक्रियापेक्षयापृथ
क्क्रियतेतत्रासमर्थ्यान्निषेधःप्रवर्तते अथवापंचमीसमासःयस्मात्क्षरमतीतोहमक्ष
रादपिचोत्तमःअतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमइतिभगवद्वचनात् २४ १६ सर्वः
शर्वःशिवःस्थाणुर्भूतादिर्निधिरव्ययः संभवोभावनोभर्ताप्रभवःप्रभुरीश्वरः १७ असतश्च

स.टी. १५
15

सतश्चैव सर्वस्य प्रभवाप्ययात् सर्वस्य सर्वदा ज्ञानात्सर्वमेनं प्रचक्षते इति भगवद्व्यासवचनात्सर्वः २५
शृणाति सकलाः प्रजाः संहरतीति शर्वः २६ निस्त्रैगुण्यतया शुद्धत्वाच्छिवः स ब्रह्मा स शिव इति भे
दोपदेशाच्छिवादिनामभिर्हरिरेव स्तूयते २७ स्थिरत्वात्स्थाणुः २८ भूतानामादिकारणत्वाद्भू
तादिः २९ प्रलयकालेऽस्मिन्सर्वं निधीयते इति निधिः कर्मण्यधिकरणे चेति किः प्रत्ययः सत्
वनिधिर्विशिष्यते अव्यय इति अव्ययो निधिः ३० स्वेच्छया समीचीनं भवनमस्येति संभवः ध
र्मसंस्थापनार्थाय संभवामि युगे युगे इति भगवद्वचनात् ३१ भोक्तॄणां फलानि भावयतीति भा
वनः सर्वफलदातृत्वं फलमत उपपत्तेरिति च प्रतिपादितं ३२ प्रपंचस्याधिष्ठानत्वेन भरणाद्भर्ता
३३ प्रकर्षेण महाभूतान्यस्माज्जायन्त इति प्रभवः प्रकृष्टो भवो जन्मास्येति वा ३४ सर्वासु क्रिया
सु सामर्थ्यातिशयात्प्रभुः ३५ निरुपाधिकमैश्वर्यमस्यास्तीतीश्वरः एष सर्वेश्वर इति श्रुतेः १
३६ १७ स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः अनादिनिधनो धाता विधाता धातुरुत्तमः १८
स्वयमेव भवतीति पुरोन भावयतीति स्वयंभूः स एव स्वयमुद्बभाविति मानवं वचः एषामुपरि भ
वति यस्माच्च परि भवति स स्वयमेव भवतीति वा स्वयंभूः परिभूः स्वयंभूरिति मन्त्रवर्णात् अर्थपती
वा स्वयंभूः परमेश्वरः स्वयमेव स्वतन्त्रो भवति न परतन्त्रः सर्वदेति पराञ्चि खानि व्यतृणत्स्वयंभूरिति मन्त्रवर्णात् ३१ १५

तिशंभुः ३८ आदित्यमंडलांतस्थो हिरण्मयः पुरुष आदित्यः द्वादशादित्येषु विष्णुर्वा आदि
त्यानामहं विष्णुरित्युक्तेः अदितेरखंडिताया मह्या अयं पतिरिति वा इयं वा अदितिर्मही
देवी विष्णुपत्नीति श्रुतेः यथादित्य एक एवानेकेषु जलभाजनेष्वनेकवत्प्रतिभासते एव
मनेकेषु शरीरेष्वेक एवात्मानेकवत्प्रतिभासते इत्यादित्यसाधर्म्याद्वा आदित्यः ३९ पुष्क
रवोत्तमणी अस्येति पुष्कराक्षः ४० महानूर्जितः स्वनो नादः श्रुतिलक्षणो वा यस्य स म
हास्वनः सन्महदादित्यादिनामसमासे कृते आन्महतः समानाधिकरणजातीययोरित्यात्वं ।
अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेद इत्यादिश्रुतेः ४१ आदिर्जन्म निध
नं विनाशस्ते द्वे यस्य न विद्येते सोनादिनिधनः ४२ अनंतादिरूपेण विश्वं बिभर्तीति धा
ता ४३ कर्मणां तत्फलानां च कर्ता विधाता अनंतादीनपि धारणकान् विशेषेण दधाती
ति वा विधाता ४४ धातूत्तम इति नामैकं सविशेषणं समानाधिकरणेन सर्वधातूत्तमः
पृथिव्यादिभ्यः २ उत्कृष्टश्चिद्धातुरित्यर्थः धातुर्विरिंचेस्तदुत्कृष्ट इति वा नामद्वयं वा कार्यकारणप्रपंचधार
णाच्चिद्धातुरुत्तमः सर्वेषामुद्गतानामतिशयेनोद्गतत्वादुत्तमः ४५ ॥८॥ अप्रमेयो हृषीके

सही·
१६
16

पद्मनाभोमरप्रभुः विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥ शास्त्रादिरहितत्वाच्च प्रत्य-
क्षगम्यताप्यनुमानुर्विशेषलिङ्गाभावात् नाप्युपमानसिद्धो निर्भागत्वेन सादृश्याभावात्
नाप्यर्थापत्तिग्राह्यस्तद्विनानुपपद्यमानस्यासंभवात् नाप्यभावगोचरो भावरूपत्वात्प्रभाव-
साक्षित्वाच्च नापि शास्त्रप्रमाणवेद्यः प्रमाणजन्यातिशयाभावात् यद्येवं शास्त्रयोनित्वं कथ-
मुच्यते प्रमाणादिसाक्षित्वेन प्रकाशस्वरूपस्य प्रमाणाविषयत्वेप्यध्यस्तातद्रूपनिवर्तक-
त्वेन शास्त्रप्रमाणकत्वमित्यतोऽप्रमेयः ४६ हृषीकाणीन्द्रियाणि तेषामीशः हृषीकेशः क्षेत्र-
ज्ञरूपभाक् यद्वा इन्द्रियाणि यस्य वशे वर्तन्ते स परमात्मा यस्य वा सूर्यरूपस्य चन्द्ररूपस्य जगत्प्री-
तिकरा हृष्टाः केशाः रश्मयो सौ हृषीकेशः हृषेरोदरादित्वात्साधुत्वं तथाचोक्तं मोक्षधर्मे सूर्या-
चन्द्रमसौ शश्वत् अंशुभिः केशसंज्ञितैः बोधयंस्तापयंश्चैव जगदुत्तिष्ठतः पृथक् बोधनात्
स्वापनाच्चैव जगतो हर्षणं भवेत् अग्निषोमकृतैरेवं कर्मभिः पाण्डुनन्दन हृषीकेशोऽहमीशा-
नो वरदो लोकभावन इति ४७ सर्वजगत्कारणं पद्मं नाभौ यस्य स पद्मनाभः अजस्यनाभावध्येक-
मर्पितमिति श्रुतेः ४८ अमराणां प्रभुरमरप्रभुः ४९ विश्वं कर्म क्रिया यस्य स विश्वकर्मा क्रिय-

नइतिजगत्कर्मविश्वंकर्मयस्येतिवा विंविचित्रनिर्माणशक्तिमत्त्वाद्वाविश्वकर्मात्वष्टुःसाहरणाद्वा
५० मननान्मनुःनान्यतोस्तिमंतेतिश्रुतेः मंत्रोवाप्रजापतिर्वामनुः ५१ त्वष्टतेसत्त्वकरणा
द्धीच्च प्रत्ययात्संहारसमयेसर्वभूतततनूकरणात्वष्टा ५२ अतिशयेनस्थूलःस्थविष्ठः ५३ पु
राणःस्थविरः त्वेषंद्यासस्थविरस्यनामेतिबह्वृचाः वयोवचनोवास्थिरत्वात्ध्रुवःस्थविरोध्रु
वइत्येकनामसविशेषेण ५४ अग्राह्यःशाश्वतःकृष्णोलोहिताक्षःप्रतर्दनः प्रभूतस्त्रिककु
ब्धामपवित्रंमंगलंपरं २० कर्मेन्द्रियैर्नगृह्यतइत्यग्राह्यः ५५ सर्वेषुकालेषुभवतीतिशाश्वतः
शाश्वतंशिवमच्युतमितिश्रुतेः ५६ सदानंदात्मकःकृष्णः कृषिर्भूवाचकःशब्दःणश्चनि
र्वृतिवाचकः विष्णुस्तद्भावयोगाच्चकृष्णोभवतिशाश्वतइतिव्यासवचनात् कृष्णोवर्णश्चमे
यस्मात्तस्मात्कृष्णोहमर्जुनइतिवासः ५७ लोहितेक्षणीयस्यसलोहिताक्षः समाहृषभोलोहिता
क्षइतिश्रुतेः ५८ प्रलयेभूतानिहिनस्तीतिप्रतर्दनः ५९ ऐश्वर्यादिगुणैःसंपन्नःप्रभूतः ६०
ऊर्ध्वाधोमध्यभेदेनतिसृणांककुभांधामेतित्रिककुब्धामेत्येकंपदं ६१ येनपुनातियोवापुना
तिऋषिर्देवतावातत्पवित्रं पुवःसंज्ञायांकर्त्तरिचऋषिदेवतयोरितिभगवत्पाणिनिवचनादि

स.टी.
१७
17

त्रिचप्रत्ययः ६१ अशुभानि निराचष्टे तनोति शुभसंततिं स्मृतिमात्रेण यत्पुंसां ब्रह्म तन्मंगलं विदुरिति विष्णु
पुराणे कल्याणरूपत्वाद्वा मंगलं सर्वभूतेभ्य उत्कर्षात्परं ब्रह्म मंगलं परमित्येकमिदं नाम सवि
शेषणं ६२ २ ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः हिरण्यगर्भो भूगर्भो माधवो मधुसू
दनः २१ सर्वभूतानां नियंतृत्वादीशानः ६४ प्राणान्ददाति चेष्टयतीति प्राणदः कोह्येवान्यात्कः
प्राण्यादिति श्रुतेः यद्वा प्राणान्कालात्मना द्यति खंडयतीति प्राणदः प्राणान्दापयति शोधयती
ति वा प्राणान्द्यति लुनातीति वा ६५ प्राणितीति प्राणः क्षेत्रज्ञः परमात्मा वा प्राणस्य प्राणमिति श्रु
तेः मुख्यप्राणो वा ६६ वृद्धतमो ज्येष्ठः ज्य चेत्यधिकारे वृद्धस्य चेति प्रकृतस्य ज्यादेशविधानात् ६७
प्रशस्यतमः श्रेष्ठः प्रशस्यस्य श्र इति श्रादेशविधानात् प्राणो वाव ज्येष्ठश्च श्रेष्ठश्चेति श्रुतेः मुख्य
प्राणो वा श्रेष्ठः स्तोत्रव्य उक्तनामद्वयार्थेऽप्यर्थः धिकरणसिद्धत्वात् सर्वकारणत्वाद्वा ज्येष्ठः सर्वा
तिशयत्वाद्वा श्रेष्ठः ६८ ईश्वरत्वेन सर्वासां प्रजानां पतिः ६९ हिरण्मयांडांतर्वर्त्तित्वात् हिरण्यग
र्भः हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीदिति मंत्रवर्णात् ७० भूर्गर्भे यस्य सः
भूगर्भः ७१ मायायाः श्रियो धवः पतिर्माधवः मधुविद्यावबोध्यत्वाद्वा माधवः मौनाद्ध्यानाच्च

योगाद्वा विद्धि भारत माधवमिति व्यासवचनाद्वा माधवः ७२ मधुनामानमसुरं सूदितवानिति मधु
सूदनः ७३ २१ ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः अनुत्तमो दुराधर्षः कृतज्ञः कृति
रात्मवान् २२ सर्वशक्तिमत्वादीश्वरः ७४ विक्रमः शौर्यं तद्योगाद्विक्रमी ७५ धनुरस्यास्तीति ध
न्वी रामः शस्त्रभृतामहमिति भगवद्वचनात् ७६ मेधा बहुग्रन्थधारणसामर्थ्यं सा यस्यास्ती
ति मेधावी अस्मायामेधास्रजो विनिरिति पाणिनिवचनाद्विनिप्रत्ययः ७७ विचक्रमे जग
द्विश्वं तेन विक्रमः वीना पक्षिणा क्रमणाद्वा विक्रमः ७८ क्रमणात्क्रमहेतुत्वाद्वा क्रमः ७
क्रान्तो विष्णुरिति मनुवचनात् ७९ अविद्यमान उत्तमो यस्मात्स अनुत्तमः यस्मात्परं नाप
रमस्ति किंचिदिति श्रुतेः ८० दैत्यादिभिः प्रधर्षयितुं न शक्यत इति दुराधर्षः ८१ कृतज्ञः
प्राणिनां पुण्यापुण्यात्मकं कर्म जानातीति कृतज्ञः यत्र पुष्पादिकमल्पमपि प्रयच्छतां मोक्षं
ददातीति वा कृतज्ञः ८२ पुरुषः प्रयत्नः कृतिः क्रिया वा कृतिः सर्वात्मकत्वात् तदाधारत
यालक्ष्यत इति वा कृतिः ८३ स्वमहिम्नि प्रतिष्ठितत्वादात्मवान् ८४ २२ सुरेशः शरणं शर्म वि
श्वरेताः प्रजाभवः अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ८५ सुराणां देवानामीशः सुरे

स॰टी॰
१८
18

शः ८५ आर्त्तानामार्त्तिहरत्वात् शरणं ८६ परमानंदरूपत्वात् शर्म्मः ८७ विश्वस्य कारणत्वाद्विश्व
रेताः ८८ सर्व्वाः प्रजाः यस्माच्छाकाद्भवंतीति प्रजाभवः ८९ प्रकाशरूपत्वादहः ९० काला
त्मना स्थितो विश्वः संवत्सर इत्युक्तः ९१ दुराधर्षगजवद्ग्रहीतुमशक्यत्वाद्व्यालः ९२ प्रतीतिः
प्रज्ञेति प्रत्ययः प्रज्ञानं ब्रह्मेति श्रुतेः ९३ सर्व्वाणि दर्शनानि अक्षीणि यस्य सर्व्वदर्शनः सर्व्वा
त्मकत्वात् विश्वतश्चक्षुर्विश्वात्ममिति श्रुतेः ९४ २३ अजः सर्व्वेश्वरः सिद्धः सिद्धिः सर्व्वादि
रच्युतः वृषाकपिरमेयात्मा सर्व्वयोगविनिःसृतः २४ न जायत इत्यजः न जातो न जनिष्यत इ
ति श्रुतेः ९५ सर्व्वेषामीश्वराणामपीश्वरत्वात्सर्व्वेश्वरः ९६ नित्यनिष्पन्नरूपत्वात्सिद्धः ९७
सर्व्ववस्तुषु संविद्रूपत्वान्निरतिशयफलरूपत्वाद्वा सिद्धिः स्वर्गादीनां विनाशित्वादफलत्वं ९८
सर्व्वभूतकारणत्वात्सर्व्वादिः ९९ स्वरूपसामर्थ्यान्न च्युतो न च्यवते न च्यविष्यत इति सोऽच्युतः
शाश्वतं शिवमच्युतमिति श्रुतेः तथा भगवद्वचनं यस्मान्न च्युतपूर्व्वोऽहमच्युतस्तेन कर्म्मणेति
१०० इति नाम्नामाद्यं शतं विवृतं विश्वं परमात्मानारसिंहवपुः संभवः महात्मनः मनः त्रिककु
द्धाम भूगर्भः दुराधर्षः संवत्सरः १ वर्षणात्सर्व्वकामानां धर्मो वृषः कांतो याति भूमिमया

दिति कपिर्वराहः वृषत्वात् कपित्वाच्च वृषः कपिः कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते तस्माद्वृ
षाकपिं प्राह कश्यपो मां प्रजापतिरिति महाभारते १ इयानिति मातुं परिच्छेत्तुं न शक्यते आत्मा
ऽस्येत्यमेयात्मा २ सर्वसंबंधविनिर्गतः सर्वयोगविनिःसृतः असंगो ह्ययं पुरुष इति श्रुतेः ना
नाशास्त्रोक्तयोगाद्दवगतो वा सर्वयोगविनिःसृतः ३ २४ वसुर्वसुमनाः सत्यः समात्मा संमितः
समः अमोघः पुंडरीकाक्षो वृषकर्मा वृषाकृतिः २५ वसंति सर्वभूतान्यत्र तेष्वयमपि वसती
ति वसुः वसूनामस्मि पावक इत्युक्तो वा वसुः ४ वसुशब्देन धनवाचिना प्राशस्त्यं लक्ष्यते प्रश
स्तं मनो यस्य स वसुमनाः रागद्वेषादिभिः क्लेशैर्मदादिभिरुपक्लेशैश्चायतानकलुषितं चित्तं तत
स्तन्मनः प्रशस्तं ५ अवितथरूपत्वात्परमात्मा सत्यः सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेः मूर्तामू
र्तात्मकत्वाद्वा सच्च त्यच्चाभवदिति श्रुतेः सदिति प्राणस्तीत्यन्नं यमिति दिवाकरः तेन प्राणान्ना
दित्यरूपत्वाद्वा सदिति प्राणस्तीत्यन्नं यमित्यसावादित्य इति श्रुतेः सत्सु साधुत्वाद्वा सत्यः ६ स
मश्चात्मा मनो यस्य स समात्मा सर्वभूतेषु सम एक आत्मा वा समम् आत्मेति विशादिति श्रुतेः ७
सर्वैरर्थजातैः परिच्छिन्नो मितः संमितः सर्वैरपरिच्छिन्नो मितः इत्यसंमितो वा ८ सर्वकाले

स्री·
१९
19

षसर्वविकाररहितत्वात्समः ९ पूजितात्मतः सर्वं प्रत्येददातीति नत्तथाकरोतीत्यमोघः अवितथसंकल्पत्वा
द्वासत्यसंकल्प इति श्रुतेः १० हृदयाख्यं पुण्डरीकमश्नुते व्याप्नोतीति पुण्डरीकाक्षः हृत्पुण्डरीकपुरमध्ये
मस्थमिति श्रुतेः आदित्यपुण्डरीकसकाशाक्षोऽस्येति वा ११ धर्मलक्षणं कर्मास्येति वृषकर्मास्ये
ति वृषकर्मा १२ धर्मार्थाकृतिरस्येति वृषाकृतिः धर्मसंस्थापनार्थाय संभवामीति भगवद्वचना
त १३ २५ रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः अमृतः शाश्वतस्थाणुर्वरारोहो महातपाः
२६ महाकाले मज्जाः संहरन् रोदयतीति रुद्रः रुद्रं राति वा रुद्रः रुद्रं दुःखं दुःखकारणं वा द्रावयती व
ति वा रुद्रः रुद्रं दुःखं दुःखहेतुं वा विद्रावयति यः प्रभुः रुद्र इत्युच्यते तस्माच्छिवः परमकारणमि
ति लिङ्गपुराणवचनात् १४ बहूनि शिरांस्यस्येति बहुशिराः सहस्रशीर्षः पुरुष इति श्रुतेः १५
बिभर्ति लोकानिति बभ्रुः १६ विश्वकारणत्वेन विश्वकारणत्वेन विश्वयोनिः १७ शुचीनि श्र
वांसि नामानि श्रवणीयान्यस्येति शुचिश्रवाः १८ न विद्यते मृतं मरणमस्येत्यमृतः १९ शाश्व
तश्चासौ स्थाणुश्चेति शाश्वतस्थाणुः २० वरमारोहो क्रोडः अस्येति वरारोहः वरमारोहणमस्मि
न्निति वा आरूढानां पुनरावृत्त्यसंभवात् यं प्राप्य न निवर्तन्ते तद्धाम परमं ममेति भगवद्वचनात् १९

२१ महत्सर्वविषयंज्ञानमस्येतिमहातपाः यस्यज्ञानमयंतप इतिमंत्रवर्णात् ऐश्वर्यंप्रतापोवामह
दस्येतिवामहातपाः २२ २६ सर्वगः सर्वविद्भानुर्विष्वक्सेनोजनार्दनः वेदोवेदविदव्यंगोवेदांगो
वेदवित्कविः २७ सर्वत्रगच्छतीतिसर्वगः कारणत्वेनव्याप्तत्वात् २३ सर्वंवेत्तिविंदतेवाइति
सर्ववित् भातीतिभानुः सर्ववित्चासौभानुश्चेतिसर्वविद्भानुः तमेवभान्तमनुभातिसर्वमिति
श्रुतेः २४ विष्वग्गच्छतिलीयतेदैत्यसेना यस्यरणेविष्वक्सेनः २५ जनान्दुर्जनान्अर्दयतेहि
नस्तिनरकादीन्गमयतीतिवाजनैः पुरुषार्थमभ्युदयनिःश्रेयसलक्षणंयाच्यते इतिवाज
नार्दनः २६ वेदयतीतिवेदः तेषामेवानुकंपार्थमहमज्ञानजंतमः नाशयाम्यात्मभावस्थो
ज्ञानदीपेनभास्वतेतिभगवद्वचनात् २७ यथावद्वेदार्थंवेत्तीतिवेदवित् वेदांतकृद्वेदवि
देवचाहमितिभगवद्वचनात् २८ अव्यंगोज्ञानादिभिःपरिपूर्णोविकलइत्युच्यते व्यंगोव्यक्तिः
नविद्यतेयस्यसोव्यंगोवा अव्यक्तोयमितिभगवद्वचनात् २९ वेदांगानिअंगभूतानियस्यसवेदां
गः ३० वेदान्विचारयतीतिवेदवित् ३१ क्रांतदर्शीकविः सर्वदृक् नान्योतोऽस्तिद्रष्टा इतिश्रु
तेः ३२ २७ लोकाध्यक्षः सुराध्यक्षोधर्माध्यक्षः कृताकृतः चतुरात्माचतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः

स॰
टी॰
२
20

२८ लोकानध्यक्षयतीति लोकाध्यक्षः ३३ लोकपालादि सुराणामध्यक्षः सुराध्यक्षः ३४ धर्माध
र्मौ साक्षाद्दीक्षते नदनरूपफलं ददाति तस्माद्धर्माध्यक्षः ३५ कृतः स्वकार्यरूपेणाकृतः स्वकारण
रूपेणेति कृताकृतः ३६ सर्गादिषु चतुर्धा विभक्त चतस्र आत्मानोऽस्येति चतुरात्मा ब्रह्माद
त्यादयः कालस्तथैवाखिलजन्तवः विभूतयो हरेरेता जगतः सृष्टिहेतवः विष्णुर्मन्वादयः कालः
सर्वभूतानि च द्विज स्थितेर्निमित्तभूतस्य विष्णोरेता विभूतयः रुद्रः कालोऽन्तकाद्याश्च समस्ताश्चै
व जन्तवः चतुर्धा प्रलयायैता जनार्दनविभूतयः इति विष्णुपुराणे ३७ व्यूहात्मानं चतुर्धा वै वासु
देवादिमूर्तिभिः सृष्ट्यादीन्प्रकरोत्येष विश्रुतात्मा जनार्दनः इति व्यासवचनात् चतुर्व्यूहः ३८
श्लो५ दंष्ट्रान्तस्यास्येति चतुर्दंष्ट्रो नृसिंहविग्रहः साहस्रपाद्रूप्यं गदंष्ट्रमुच्यते चत्वारि शृङ्गा इति श्रु
तेः ३९ चत्वारो भुजा अस्येति चतुर्भुजः ४० भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः अनघो
विजयो जेता विश्वयोनिः पुनर्वसुः २९ प्रकाशैकरसत्वाद्भ्राजिष्णुः ४१ भोज्यरूपतया प्रकृति
र्मायाभोजनमुच्यते ४२ पुरुषरूपेण तां प्रकृतिं भुङ्क्ते इति भोक्ता ४३ हिरण्याक्षादीन्सहते अभि
भवतीति सहिष्णुः ४४ हिरण्यगर्भरूपेण जगदादावुत्पद्यते स्वयमिति जगदादिजः ४५ नविघ

२

अथेंश्रेयोत्यनन्तः अथ हन्तया याध्येति स्मृतेः ४६ विजयते ज्ञानैश्वर्यादिभिर्गुणैर्विश्वमिति विजयः
४७ यतो निश्चिते सर्वभूतानि स्वभावत इति जेता ४८ विश्वं योनिर्यस्य विश्वस्यासौ योनिश्चेति वा
विश्वयोनिः ४९ पुनः पुनः शरीरेषु वसन्ति देवत्तत्रूपैति पुनर्वसुः ५० उपेन्द्रो वामनः प्रांशुर ले३
मोघः शुचिरूर्जितः अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः ७० मयोपरि यथेन्द्रस्यस्यापि
तो गोभिरीश्वरः उपेन्द्र इति कल्पत्वागास्यति दिवि देवता इति हरिवंशवचनात् उपरि इन्द्रः उ
पेन्द्रः ५१ बलिं वामनरूपेण याचितवानिति वामनः सम्भजनीय इति वा मध्ये वामनमासीनं वि
श्वेदेवा उपासत इति मन्त्रवर्णात् ५२ स एव जगत्त्रयं क्रममाणः प्रांशुरभवदिति प्रांशुः तोये
तु पतिते हस्ते वामनोभूदवामनः सर्वदेवमयं रूपं दर्शयामास सर्वविभुः भूः पादौ द्यौः शिरश्चास्य
चन्द्रादित्यौ च चक्षुषी इत्यादि विश्वरूपं दर्शयित्वा तस्य विक्रमतो भूमिं चन्द्रादित्यौ स्तनान्तरे नभः
प्रक्रममाणस्य नाभिस्थितौ समवस्थितौ दिवं विक्रममाणस्याजानुमलेख्यवस्थितावित्यादिस्मा
सुत्वं दर्शियमिति हरिवंशे ५३ न मोघं चेष्टितं यस्य सोऽमोघः ५४ पावनत्वाच्छुचिः अस्पर्शः
स्तु महानस्मि शुचिरिति मन्त्रवर्णात् ५५ बलप्रकर्षशालित्वादूर्जितः ५६ अतीन्द्रं स्थितो ज्ञाने

संग्रहः ५८ सृज्यरूपतया सर्गहेतुत्वाद्वा सर्गः ५९ एकरूपेण जन्मादिरहिततया धृतआत्मा समधृतात्मा ६० स्वेषु स्वेष्वधिकारेषु प्र।

सं॰री॰ ध्यर्यादिभिः स्वभावसिद्धैरन्वितो विशिष्टः ५७ सर्वेषां संग्रहोजा नियमयतीति नियमः ६१ अन्तर्यच्छतीति

२१। यमः ६२ ३ वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः अतीन्द्रियो महामायो महोत्साहो महावलः ३।

नि:श्रेयसार्थिभिर्वेदनार्हत्वाद्वेद्यः ६३ सर्वविद्यानां वेदितृत्वाद्वैद्यः ६४ सदाविर्भूतस्वरूपत्वात्

सदायोगी ६५ धर्मत्राणायासुरवीरान्वीर्यवतो हन्तीति वीरहा ६६ मायाविद्यायाः पतिर्माधवः।

मा विद्या च हरेः प्रोक्ता तस्या ईशो यतो भवान् तस्मान्माधवनामासि धवः स्वामीति शब्दितः इति हरि-

वंशे ६७ यथा मधु परां प्रीतिमुत्पादयति अयमपि तथेति मधुः ६८ इन्द्रियाणामविषयत्वादती-

न्द्रियः शब्दादिरहितत्वात् अशब्दमस्पर्शमिति श्रुतेः ६९ मायाविनामपि मायाकारित्वान्महामा-

यः मम माया दुरत्ययेति भगवद्वचनात् ७० जगदुत्पत्तिस्थितिलयार्थमुद्युक्तत्वान्महोत्साहः ७१

वलिनामपि वलवत्त्वान्महावलः ७२ ३। महावुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः अनिर्देश्य-

वपुः श्रीमानमेयात्मा महाद्रिधृक् ३२ वुद्धिमतामपि वुद्धिमत्त्वान्महावुद्धिः ७३ महदुत्पत्ति-

कारणमविद्यालक्षणं वीर्यमस्येति महावीर्यः ७४ महती शक्तिः सामर्थ्यमस्येति महाशक्तिः

७५ महती द्युतिर्वाह्याभ्यन्तरा चास्येति महाद्युतिः स्वयंज्योतिरिति श्रुतेः ज्योतिषां ज्योतिरिति पादे २१

स्य ७६३ इदं तदिति निर्देष्टुं यन्न शक्यते परस्मै स्वयंवेद्यत्वात् तदनिर्देश्यं वपुरस्येति अनिर्देश्यवपुः ७७ स्व
र्यलक्षणा समग्रा श्रीर्यस्य स श्रीमान् ७८ सर्वप्राणिभिरमेया बुद्धिर्यस्य सो मेयात्मा ७९ महांतं
मंदरं गोवर्द्धनं वामृतमथने गोरक्षणे च धृतवानिति महाद्रिधृक् ८० २२ महेष्वासो महीभ
र्त्ता श्रीनिवासः सतांगतिः अनिरुद्धः सुरानंदो गोविंदो गोविदांपतिः २२ महानिष्वासः इषु
र्यस्य स महेष्वासः ८१ एकार्णवाप्लुतां देवीं महीं बभारेति महीभर्त्ता ८२ यस्य वक्षस्यनपायि
नी श्रीर्निवसतीति स श्रीनिवासः ८३ पुरुषार्थसाधनप्राप्तिहेतुः सतांगतिः ८४ न केनापि प्रादु
र्भावेषु निरुध्यत इति निरुद्धः ८५ सुरानानंदयतीति सुरानंदः ८६ नष्टां वै धरणीं पूर्वमविंदं य
द्गुहागतां गोविंद इति तेनाहं देवैर्वाग्भिरभिष्टुत इति मोक्षधर्मवचनाद्गोविंदः अहं किलेंद्रो देवानां
त्वं गवामिंद्रतां गतः गोविंद इति लोकास्त्वां स्तोष्यंति भुवि शाश्वतमिति गौरेषा भवतो वाणी
तां च विंदयते भवान् गोविंदस्तु ततो देव मुनिभिः कथ्यते भवानिति हरिवंशे ८७ गावो वाणीर्विदं
तीति गोविदस्तेषां पतिर्विशेषेणेति गोविदांपतिः ८८ २२ मरीचिर्दमनो हंसः सुपर्णो भुजगो
त्तमः हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः २४ तेजस्विनामपि तेजस्त्वान्मरीचिः तेजस्ते

स॰
टी॰
२२
22

जस्विनामहमिति भगवद्वचनात् ८९ स्वाधिकारान्नमायंतीः प्रजाः दमयितुं शीलमस्यैव वस्वतादिरूपे
णेति दमनः ९० अहं सदैतितादात्म्यभावितः संसारबंधहंतीति हंसः हंति गच्छति सर्वशरीरेष्विति
वा हंसः इषोदरादित्वाच्छब्दसाधुत्वं हंसः शुचिषदिति मंत्रवर्णात् ९१ शोभनपर्णत्वात्सुपर्णः ।
द्वा सुपर्णेति मंत्रवर्णात् ९२ भुजगेन गच्छतामनंतो भुजगोत्तमः ९३ हिरण्यमिव कल्याणीना
भिरस्येति हितरमणीयनाभित्वाद्वा हिरण्यनाभः ९४ बदरिकाश्रमे नरनारायणरूपेणा शो
भनं तपश्चरतीति सुतपाः मनसश्चेंद्रियाणां च ह्यैकाग्र्यं परमं तप इति स्मरणात् ९५ पद्ममिव
नाभिरस्येति पद्मनाभः हृदयपद्मस्य नाभौ मध्ये प्रकाशमानत्वाद्वा पद्मनाभः पृषोदरादित्वात्साधुत्वं
९६ प्रजानां पतिः प्रजापतिः ९७ २४ अमृत्युः सर्वदृक् सिंहः संधाता संधिमान्स्थिरः अजो दुर्मर्ष
णः शास्ता विश्रुतात्मा सुरारिहा २५ मृत्युर्विनाशहेतुरस्य न विद्यत इत्यमृत्युः ९८ सर्वं प
श्यति स्वाभाविकेन बोधेनेति सर्वदृक् ९९ हिनस्तीति सिंहः १०० इति नाम्नां द्वितीयं शतं वि
वृतं वृषाकपिः पुंडरीकाक्षः वरारोहः वेदवित् भ्राजिष्णुः उपेंद्रः नियमः महोत्साहः ॥ १० कर्म
फलैः पुरुषान्संधत्त इति संधाता १ फलभोक्ता च स एवेति संधिमान् २ सदैकरूपत्वात्स्थिरः ३

मदेवाकः हंसः २

अजतिगच्छतिक्षिपतीतिवाऽसुरैः ४ मर्षितुंदानवादिभिर्नशक्यतइतिदुर्मर्षणः ५ आतिसमन्ता
द्भिः सर्वेषामनुशिष्टिंकरोतीतिशास्ता ६ विशेषेणश्रुतोयेनसत्यज्ञानादिलक्षणआत्मा
सोविश्रुतात्मा ७ सुरारीणांनिहंतृत्वात्सुरारिहा ८ २५ गुरुर्गुरुतमोधामसत्यःसत्यपराक्र
मः निमिषोनिमिषःस्रग्वीवाचस्पतिरुदारधीः २६ सर्वविद्यानामुपदेष्टृत्वात्सर्वेषांज
नकत्वाद्वागुरुः ९ विरिंच्यादीनामपिब्रह्मविद्याप्रवर्तकत्वाद्गुरुतमः योब्रह्माणमितिमंत्र
वर्णितत्वात् १० धामज्योतिः नारायणः परंज्योतिरितिमंत्रवर्णात्सर्वकामानामास्पदत्वाद्वाधा
मपरंमब्रह्मधामेतिश्रुतेः ११ सत्यवदनलक्षणधर्मरूपत्वात्सत्यःतस्मात्सत्यंपरमंवदंतीति
श्रुतेः सत्यस्यसत्यमितिवा प्राणावैसत्यंतेषामेवसत्यमितिश्रुतेः १२ अवितथः क्रमो पराप
यस्यसत्यपराक्रमः १३ निमीलितेयतोनेत्रेयोगनिद्रयातोनिमिषः १४ नित्यप्रबुद्धस्वरूप
त्वात् मत्स्यरूपतयावाऽनिमिषः १५ वैजयंत्याख्यांभूततन्मात्ररूपांस्रजंनित्यंबिभर्तीति
स्रग्वी १६ वाचस्पतिरुदारधीरितिपदद्वयमेकनाम १७ २६ अग्रणीर्ग्रामणीःश्रीमान्न्यायो यर
नेतासमीरणः सहस्रमूर्धाविश्वात्मासहस्राक्षःसहस्रपात् २७ अग्रेउन्नत्यपदंनयतिमु

स॰टी॰ मुक्तानामग्रणीः १८ भूतग्रामस्य नेतृत्वाद्ग्रामणीः १९ कान्तिः सर्वातिशायिन्यस्येति श्रीमान् २०
२३ प्रमाणानुग्राहकोऽभेदकारकस्तर्को न्यायः २१ जगद्यन्त्रनिर्वाहको नेता २२ श्वसनरूपेण भू-
23 तानि चेष्टयतीति समीरणः २३ सहस्राणि मूर्द्धानोऽस्येति सहस्रमूर्द्धा २४ विश्वस्यात्मा वि-
श्वात्मा २५ सहस्राणि अक्षीणि अस्य स सहस्राक्षः २६ सहस्राणि पादा अस्येति सहस्रपात् सह-
स्रशीर्षा पुरुष इति मन्त्रवर्णात् २७ ३७ आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः अहः संवर्त-
को वह्निरनिलो धरणीधरः ३८ आवर्तयति संसारचक्रं शीलमस्येत्यावर्तनः २८ संसारबन्धा-
न्निवृत्त आत्मा स्वरूपमस्येति निवृत्तात्मा २९ आच्छादकया विद्यया संवृतत्वात्संवृतः ३० सम्य-
क्प्रमर्दयति रुद्रकालादिभिर्विभूतिभिरिति संप्रमर्दनः ३१ सम्यगानन्दप्रवर्तनात्सूर्योऽहः सं-
प्रवृत्तकः ३२ वह्निर्वह्निः ३३ अनादित्वादनिलयोऽसावनिलः ३४ शेषदिग्गजादिरूपेण ध-
रणीं धत्त इति धरणीधरः ॥ ३५ सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः सत्कर्ता स-
त्कृतः साधुर्जह्नुर्नारायणो नरः ३९ शोभनः प्रसादो यस्य अपकारवतामपि शिशुपाला-
दीनां मोक्षप्रदानत्वादिति सुप्रसादः ३६ रजस्तमोभ्यामकलुषितमात्मान्तःकरणमस्येति २३

प्रसन्नात्माकरुणार्द्रस्वभावत्वाद्वा प्रसन्नात्मावाप्तसर्वकामत्वाद्वा ३७ विश्वं धत्तेतीति विश्वधृक् ३८
विश्वं भुङ्क्ते भुनक्ति पालयतीति विश्वभुक् ३९ हिरण्यगर्भादिरूपेण विविधं भवतीति विभुः
नित्यं विभुमिति मन्त्रवर्णात् ४० सत्करोतीति पूजयतीति सत्कर्ता ४१ पूजितैरपि पूजितः सत्कृ-
तः ४२ न्यायप्रवृत्ततया साधुः साधयतीति वा साध्यभेदाननुपादान् साध्यमात्रसाधकः ४३ जनान्सं-
हारसमये पह्नुत्य पनयतीति जह्नुः जहात्यविदुषो भक्तान्नयति परं पदमिति वा ४४ नर आत्मा
ततो जातान्याकाशादीनि नाराणि तानि कार्याणि अयनं कारणात्मना व्याप्नोति ततश्च तान्यस्यायन-
मिति नारायणः यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेपि वा अन्तर्बहिश्च तत्सर्वं व्याप्य नारायण
स्थित इति मन्त्रवर्णात् नराज्जातानि तत्त्वानि नाराणीति विदुर्बुधाः तान्यव चायनं तस्य तेन नाराय-
णः स्मृतः इति महाभारते अयनत्वात्प्रलये इति वा यत्प्रयंत्यभिसंविशतीति श्रुतेः आपो नारा इति
प्रोक्ता आपो वै नरसूनवः ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः इति मनुवचनाद्वा नारायणः नाः
रायणाय नम इत्यमुमेव सततं संसारघोरविषदंहरणाय मन्त्रं स्मर एवं जन्मभयमतयो यतयोल्लवागा
उच्चैस्तराम्मुपदिशाम्यहमूर्ध्वबाहुरिति नृसिंहपुराणे ४५ नयतीति नरः प्रोक्तः परमात्मा सनातन

सटी. २४

24

इति व्यासवचनादनन्तः ४६ ॥ २६ ॥ असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः सिद्धार्थः सिद्धसंकल्पः
सिद्धिदः सिद्धिसाधनः ४० यस्मिन्संख्यादिभेदादिर्न विद्यते इत्यसंख्येयः ४७ अप्रमेयश्चासावात्मा स्वरूपं य
स्येति अप्रमेयात्मा ४८ अतिशयेन सर्वस्मात् विशिष्टः ४९ शिष्टशासनं करोतीति शिष्टकृत् शिष्टान्
करोति पालयति सामान्यवचनो धातुर्विशेषवचने दृष्टः इन्धनकाष्ठानीति आहरणे यथा तद्वदि
ति वा शिष्टकृत् ५० निरंजनः शुचिः ५१ सिद्धो निर्हितोर्थो मानोस्येति सिद्धार्थः सत्यकाम इति श्रु
तेः ५२ सिद्धो निष्पन्नः संकल्पोऽस्येति सिद्धसंकल्पः सत्यसंकल्प इति श्रुतेः ५३ सिद्धीः फलानि
कर्तृभ्यः स्वाधिकारानुरूपतो ददातीति सिद्धिदः ५४ सिद्धेः साधकत्वात् सिद्धिसाधनः ५५ ४० वृषाही वृ
षभो विष्णुर्वृषपर्वा वृषोदरः वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ४१ वृषो धर्मः पुण्यं तद्देवाहः ॥ द्वादशाहस्य / तिसह्रवृषाहः ५
मोऽस्यास्तीति वृषाही ५६ वर्षत्येष कामान्भक्तेभ्य इति वृषभः ५७ विष्णुर्विचक्रमणादिति विष्णुः ५८
वृषरूपाणि पर्वाणि पादाः परमधामारुरुक्षोरस्येति वृषपर्वा ५९ प्रजा वर्षन्त्युदरमस्येति वृषोदरः ६०
वर्धयतीति वर्धनः ६१ प्रपंचरूपेण वर्धत इति वर्धमानः ६२ उभयवर्धमानोऽपि पृथग्गेव तिष्ठतीति वि
विक्तः ६३ श्रुतयः सागर इवात्र निधीयन्त इति श्रुतिसागरः ६४ ॥ ४१ ॥ सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो

वसुः नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ४२ शोभनाभुजाजगद्रक्षाकराअस्येतिसुभुजः ।
६५ पृथिव्यादीन्यपिलोकधारकाण्यन्यैर्धारयितुमशक्यानिधारयन्नकेनापिधारयितुंशक्य
तइतिदुर्धरः दुःखेनध्यानसमयेमुमुक्षुभिर्हृदयेधार्यतइतिवादुर्धरः ६६ यतोनिःसृताब्रह्म
मयीवाक्तस्माद्वाग्मी ६७ महांश्चासौइन्द्रश्चमहेन्द्रः ६८ वसुधनंददातीतिवसुदः अन्नादोव
सुदानइतिश्रुतेः ६९ दीयमानंवस्वपिसएवेतिवसुः छादयित्वात्मनःस्वरूपंमाययेतिवा
वसुः असाधारणेनानुवसनेनवायुर्वावसुः वसुरन्तरिक्षसदितिश्रुतेः ७० एकंरूपमस्यनवि
द्यतइतिनैकरूपः ज्योतींषिविष्णुर्भुवनानिविष्णुरितिश्रीविष्णुपुराणे ७१ बृहन्महद्वपुर्यथा
तलविभ्रद्वराहद्रूपमस्येतिबृहद्रूपः ७२ शिपिःपशवस्तेषुप्रतितिष्ठतियज्ञरूपेणेतिशिपि
विष्टःशिपिविष्टाययजुःश्रुतिः शिपयोरश्मयस्तेषुनिविष्टइतिवा शैत्याच्छुपयनयोगाच्चशीति
वारिप्रवर्त्ततेतत्पानाद्रक्षणाच्चैवशिपिषयोरश्मयोमताः तेषुप्रवेशाद्विप्रेशःशिपिविष्टइहो
च्यते ७३ सर्वेषांप्रकाशनशीलत्वात्प्रकाशनः ७४ ५२ ओजस्तेजोद्युतिधरःप्रकाशात्माप्रताप
नः ऋद्धःस्पष्टाक्षरोमन्त्रश्चन्द्रांशुर्भास्करद्युतिः ४३ ओजः प्राणोबलंतेजःशौर्यादयोगुणाःद्युति

सही. २५
25

दीप्तिस्तान्धारयतीति ओजस्तेजो द्युतिधरः अथवा ओजस्तेजः इति नामद्वयं बलं बलवतां चाहं तेजस्तेजस्विना
महमिति भगवद्वचनात् ज्ञानलक्षणां दीप्तिं धारयतीति द्युतिधरः ७५ प्रकाशस्वरूपः प्रकाशात्मा ७६
सवित्राद्याभिर्विभूतिभिर्विश्वमतापयतीति प्रतापनः ७७ धर्मज्ञानवैराग्यादिभिरूपेतत्वात् ऋ
द्धः ७८ स्पष्टमुदात्तमोंकारलक्षणमक्षरमस्येति स्पष्टाक्षरः ७९ ऋग्यजुःसामलक्षणो मंत्रो
धात्वाद्वा मंत्रः ८० संसारतापतिग्मांशुतापतापितचेतसां चंद्रांशुरिवाह्लादकरत्वात् चंद्रांशुः ८१
भास्करद्युतिसाधर्म्यात् भास्करद्युतिः ८२ ४३ अमृतांशूद्भवो भानुः शशिविंदुः सुरेश्वरः औष
धं जगतः सेतुः सत्यधर्मपराक्रमः ४४ मथ्यमाने पयोनिधावमृतांशुश्चंद्रस्तस्योद्भवो यस्मात्सो
ऽमृतांशूद्भवः ८३ भातीति भानुः तमेव भांतमनुभाति सर्वमिति श्रुतेः ८४ शशिविंदुश्चंद्रस्तद्व
त्प्रजाः पुष्णातीति शशिविंदुः पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मक इति भगवद्वचनात् ८५
सुराणां देवानां शोभनदातृणामीश्वरः ८६ संसाररोगभेषजत्वात् औषधं ८७ जगतां समुत्तारण
हेतुत्वात्सेतुर्भेदकरणाद्वा वर्णाश्रमादीनामिति जगतः सेतुः एष सेतुर्विधारण एषां लोकानामसं
भेदायेति श्रुतेः ८८ सत्याश्च वितथा धर्मा ज्ञानादयो गुणाः पराक्रमश्च यस्य स सत्यधर्मपराक्रमः

सुरेश्वरः ३

८९ ४४ भूतभव्यभवन्नाथः पवनः पावनोनलः कामहाकामकृत्कान्तः कामः कामप्रदः प्रभुः ४५ भू
तभव्यभवतां भूतग्रामाणां नाथ्यते याच्यते नानुपतापयति तेभ्य आशास्ते तेषामीष्टे
इति वा भूतभव्यभवन्नाथः ९० पवन इति पवनः पवतामस्मीति भगवद्वचनात् ९१ पावय
तीति पावनः भीषास्माद्वातः पवत इति श्रुतेः ९२ अनान् प्राणान् लाति आत्मत्वेन स्वीकरोती
ति जीवोनलः नलतेर्गन्धवाचिनो न जघ्रौ वा अगन्धकाद्यमरसमिति श्रुतेः नालं पर्याप्तमस्य
विद्यत इति वा ९३ कामान्हन्तीति मुमुक्षूणां हिंसकानां चेति कामहा ९४ सात्त्विकानां कामिनां का
मान् करोतीति कामकृत् कामस्य प्रद्युम्नस्य जनकत्वाद्वा कामकृत् ९५ अभिरूपतमः कान्तः ९६
काम्यते मोक्षकाङ्क्षिभिरिति कामः ९७ भक्तेभ्यः कामान्प्रकर्षेण ददातीति कामप्रदः ९८ प्रकर्षेण भ
वनात्प्रभुः ९९ ४५ योगादिकृद्युगावर्तो नैकमायो महाशनः अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्त
जित् ४६ युगादेः कालभेदस्य कर्तृत्वात् युगादिकृत् युगानामारम्भं करोतीति वा युगादिकृत् च
इति नाम्नात्र नीयमानेन विहृते सधाता धाममन्यायः सप्तमर्द्धनः सत्कर्ता पूतिः वर्द्धनः नैकरूपः
वेद्यो स्य पवनः १ कृतादीनि आवर्तयति कालात्मना तस्माद्युगावर्तः १०१ कामायानविघ्नेव

ह्रीर्माया वहतीति नैकमायः न लोपो नञ इति नकारलोपो न भवति नकारान्तत्वेऽथ रहितस्यापि नका
रस्य प्रतिषेधवाचिनो विद्यमानत्वात् २ कल्पान्ते सर्वग्रसनान्महाशनः ३ सर्वेषां बुद्धीन्द्रियाणामगम्य
त्वाददृश्यः ४ स्थूलरूपेणाव्यक्तरूपमस्येति व्यक्तरूपः स्वयंप्रकाशत्वाद्व्यक्तरूपो वा ५ सहस्राणि श
त्रूणां जयतीति सहस्रजित् ६ सर्वभूतानि युद्धक्रीडादिषु सर्वत्राचिन्त्यशक्तितया जयतीत्यनन्त
जित् ७ ४६ इष्टोऽविशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्मही
धरः ४७ परमानन्दात्मकत्वेन प्रियत्वादिष्टः यज्ञेन पूजित इति वेष्टः ८ सर्वेषामन्तर्यामित्वेन न विशि
ष्यत इत्यविशिष्टः ९ शिष्टानां विदुषामयमिष्टः शिष्टेष्टः प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रि
यः इति भगवद्वचनात् शिष्टैरिष्ट इति वा शिष्टेष्टः १० शिखण्डः कलापोऽलंकारणमस्येति शिखण्डी
गोपवेषधरः ११ नह्यति भूतानि माययेति नहुषः १२ कामानां वर्षणान्वृषो धर्मः १३ साधूनां क्रो
धं हन्तीति क्रोधहा १४ असाधूनां क्रोधं करोतीति क्रोधकृत् क्रियत इति कर्म जगत् तस्य कर्ता एते-
षां पुरुषाणां स कर्ता यस्य चैतत्कर्म स वै वेदितव्य इति श्रुतेः क्रोधकृत्कर्तेत्यादीनां कर्तृच्छेदक-
त्वेकं वा नाम १५ विश्वेषामालंबनत्वेन विश्वे बाहवोऽस्येति वा विश्वबाहुः विश्वतोबाहुरिति श्रुतेः

१९ महीसंज्ञां धरणीं वा धत्त इति महीधरः १०४७ अच्युतः स्थितः प्राणः प्राणदो वासवानुजः अ
पां निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ४८ षड्भावविकाररहितत्वादच्युतः १८ जगदुत्पत्त्यादि
कर्मभिः प्रख्यातः प्रथितः १९ सूत्रात्मना प्रजाः प्राणयतीति प्राणः प्राणो ह्वाहमस्मीति बह्वृ
चाः २० सुराणामसुराणां च प्राणं बलं ददातीति द्यति वा प्राणदः २१ अदित्यां कश्यपाद्वासव सा
तज्जो जात इति वासवानुजः २२ आपो यत्र निधीयन्ते सोऽपां निधिः सरसामस्मि सागर इति भगव
द्वचनात् २३ अधितिष्ठन्ति भूतानि उपादानकारणत्वेन ब्रह्मैवाधिष्ठानं मत्स्थानि सर्वभूतानीति
भगवद्वचनात् २४ अधिकारिभ्यः कर्मानुरूपं फलं प्रयच्छन्न प्रमाद्यतीत्यप्रमत्तः २५ स्वे महि
म्नि स्थितः प्रतिष्ठितः स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नीति श्रुतेः २६ ४८ स्कन्दः स्क
न्दधरो धुर्यो वरदो वायुवाहनः वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ४९ स्कन्दत्यमृतरूपेण ग
च्छति स्रवति वायुरूपेण शोषयतीति वा स्कन्दः २७ स्कन्दं धर्मपथं धारयतीति स्कन्दधरः २८ धुरं व
हति समस्तभूतजन्मादिलक्षणामिति धुर्यः २९ अभिमतान्वरान्ददातीति वरदः वरं गां द
क्षिणां ददाति यजमानरूपेणेति वा वरदः गौर्वै वर इति श्रुतेः ३० वहन्तः समावहादीन्वा

स.टी. हयतीति वायुवाहनः ३१ वसन्ति वासयत्याच्छादयतीति वा स्वयमिति वा वसुः दीव्यति क्रीडति विजिगी-
२० षते व्यवहरति द्योतते स्तूयते गच्छतीति वा देवः वासुश्चासौ देवश्च वासुदेवः छादयामि जगत्
२१ विश्वं भूत्वा सूर्य इवांशुभिः सर्वभूताधिवासश्च वासुदेवस्ततः स्मृतः वसनात्सर्वभूतानां व-
सुत्वाद्देवयोनितः वासुदेवस्ततो ज्ञेयो योगिभिस्तत्त्वदर्शिभिः इति मोक्षधर्मपर्वणि सर्वत्रासौ सम-
स्तं च वसत्यत्रेति वै यतः ततः स वासुदेवेति विद्वद्भिः परिपठ्यते इति श्रीविष्णुपुराणे ३२ बृहद्-
भानवोऽस्य चन्द्रसूर्यादिगामिनः तैर्विश्वं जगद्भासयतीति बृहद्भानुः ३३ आदिः कारणं
स च देवश्चेत्यादिदेवः दानादिगुणवान्वादिदेवः ३४ सुरशत्रूणां पुराणां दारणात्पुरंदरः वाचंय-
मपुरंदरौ चेति श्रीपाणिनिनिपातनात् ३५ ४६ अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ५ शोकादिषड्ऊर्मिभिर्वर्जितोऽशोकः ३६ संसा-
रसागरात्तारयतीति तारणः ३७ गर्भजन्मजरामृत्युलक्षणाद्भयात्तारयतीति तारः ३८ वि-
क्रमणात् शूरः ३९ शूरस्यापत्यं शौरिः ४० जनानां जन्तूनामीश्वरो जनेश्वरः ४१ आत्मत्वे-
न सर्वेषामनुकूलः नहि स्वस्मिन्प्रातिकूल्यं स्वयं समाचरति ४२ धर्मत्राणाय शतमावर्तमा- २०

मानिमाद्गर्भावास्यस्येति शश्वद्वर्तते नाडीशतेन प्राणरूपेणावर्ततत इति वा ४३ पद्मेदलेभ्यस्य विघ्नत इति
मी ४४ पद्मनिभे ईक्षणे दृशाववस्येति पद्मनिभेक्षणः ४५ ५· पद्मनाभोरविंदाक्षः पद्मगर्भः
शरीरभृत् महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः ५१ पद्मस्य नाभौ मध्ये कर्णिकायां स्थित
इति पद्मनाभः ४६ अरविंदोपमाक्षित्वादरविंदाक्षः ४७ पद्मस्य हृदयाख्यस्य मध्ये उपास्यत्वात्प
द्मगर्भः ४८ पोषयन् अन्नरूपेण प्राणरूपेण वा शरीरिणां शरीराणि धारयतीति शरीरभृत्
स्वमायया शरीराणि विभर्तीति वा ४९ महती ऋद्धिर्विभूतिरस्येति महर्द्धिः ५· प्रपंचरूपेण
वर्द्धमानत्वादृद्धः ५१ वृद्धः पुरातन आत्मास्येति वृद्धात्मा ५२ महती अक्षिणी महान्त्यक्षीणि
वास्येति महाक्षः ५३ गरुडो ध्वजोऽस्येति गरुडध्वजः ५४ ५२ अतुलः शरभो भीमः समयज्ञो हविर्हरिः
सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिंजयः ५२ तुलोपमानं न विद्यतेऽस्येत्यतुलः न तस्य प्रति
मास्ति यस्य नाम महद्यश इति श्रुतेः ५५ शराः शरीराणि शीर्यमाणत्वात्तेषु प्रत्यगात्मतया भा
तीति शरभः ५६ बिभेत्यस्मात्सर्वमिति भीमः भीमादयोऽपादाने इति पाणिनिस्मृतेः सन्मार्गव
र्तिनामभीमो वा ५७ सृष्टिस्थित्यंतकालवित् षट् समयान् जानातीति वा समयज्ञः सर्वभूतेषु

स.टी.
२८
28

समत्वं यजने यस्येति वा समयज्ञः समत्वमाराधनमच्युतस्येति भगवद्वचने ५८ यज्ञेषु हविर्भागं हरे
तीति हविर्हरिः अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेति भगवद्वचनात् अथवा हूयते हविषा
स एवेति हविः अवधूतकल्मषपस्यामिति हविरुच्यते स्मृतिमात्रेण पुंसां पापं हरतीति हरिः ह
रिद्वर्णो वा हरिः हरामि अघं हि स्मर्तॄणां हविर्भागं क्रतुष्वहं वर्णश्च मे हरिः श्रेष्ठस्तस्माद्धरिर
हं स्मृत इति व्यासवचनात् ५९ सर्वैः लक्षणैः प्रमाणैर्लक्षणं ज्ञानं जायते यत्तद्धि निर्दिष्टं
सर्वलक्षणलक्षणं तत्र साधुः सर्वलक्षणलक्षण्यः तत्स्वे वा परमार्थत्वात् ६० लक्ष्मीरस्य वक्ष
स्यसि नित्यं वसतीति लक्ष्मीवान् ६१ समितिं युद्धं जयतीति समितिंजयः ६२ ५२ विक्षरो रोहितो
मार्गो हेतुर्दामोदरः सहः महीधरो महाभागो वेगवानमिताशनः ५३ विगतः क्षरो नाशो यस्य
स्यासौ विक्षरः ६३ स्वच्छन्दतया रोहितां मूर्तिं मत्स्यमूर्तिं वहन्रोहितः ६४ मृगयन्ते तं देव
मार्गयन्ते इति मार्गः परमानन्दो येन प्राप्यते स मार्ग इति वा ६५ उपादानं निमित्तं च कारणं स
एव इति हेतुः ६६ दमादिसाधनेनोदारा उत्कृष्टा गतिर्या तया गम्यत इति दामोदरः दामो
दामोदरं विदुरिति महाभारते यशोदया दाम्ना उदरे बद्ध इति वा दामानि लोकनामानि ता ॥७

२८

नियम्योदरांतरे तेन दामोदरो देवः श्रीधरश्लिष्टसमाश्रित इति व्यासवचनात् वा दामोदरः ६७ सर्वा
नभिभवति तेजसा तेनेवा इति सहः ६८ महीं गिरिरूपेण धत्त इति महीधरः वनानि विस्तृगिरयो
दिशश्चेति पराशरोक्तेः ६९ स्वेच्छया धाम स्वदेहेऽन्यत्र यज्ञभागान् भुंक्त इति महाभागः महा
न्भागो भोग्यमस्मावर्तत इति वा महाभागः ७० वेगो जवः लद्वान् वेगवान् अनेजदेकं मनसो ज
वीय इति श्रुतेः ७१ संहारसमये विश्वमश्नातीति मिताशनः ७२ ५३ उद्भवः क्षोभणो देवः श्री
गर्भः परमेश्वरः करणं कारणं कर्ता विकर्ता गहनो गुहः ५४ प्रपंचोत्पत्त्युपादानकारणत्वादुद्भ
वः उद्भतो भवात्संसारादिति वा ७३ सर्गकाले प्रकृतिपुरुषौ च प्रविश्य क्षोभयामास इति क्षो
भणः ७४ दीव्यति यतः क्रीडति सर्गादिभिर्विजिगीषते व्यवहरति सर्वभूतेषु आत्मतया
द्योतते स्तूयते स्तुत्यैः सर्वत्र गच्छतीति तस्माद्देवः एको देव इति मंत्रवर्णात् ७५ श्रीर्विभूतिर्यस्योद
रान्तरे स श्रीगर्भः ७६ परमश्चासावीशनशीलश्चेति परमेश्वरः समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्व
रं इति भगवद्वचनात् ७७ जगदुत्पत्तौ साधकतमं करणं ७८ उपादानं निमित्तं च कारणं ७९ क
र्तास्वतंत्रः ८० विचित्रं भुवनं क्रियत इति विकर्ता सैव भगवान्विष्णुः ८१ स्वरूपसामर्थ्यचेष्टि

तेवा तस्य ज्ञातेन शक्यत इति गहनः ८२ गहते संहरणो निःस्वरूपादीनि माययेति गुहः ८३ ५४ व्यव
सायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ५५ संविन्मात्र
स्वरूपत्वाद्व्यवसायः ८४ यस्मिन्व्यवस्थितिः सर्वस्येति व्यवस्थानः लोकपालाद्यधिकारजरायु
जाण्डजस्वेदजोद्भिज्जब्राह्मणक्षत्रियवैश्यशूद्रावान्तरवर्णब्रह्मचारिगृहस्थवानप्रस्थसंन्यासा॰
लक्षणाश्रमतद्धर्मादिकान्विभज्य करोतीति वा व्यवस्थानः ८५ यत्र भूतानां संस्थितिः प्रलया
त्मिका समीचीने स्थाने संस्थेति वा संस्थानः ८६ ध्रुवादीनां कर्मानुरूपं स्थानं ददातीति स्थान
दः ८७ अविनाशित्वात् ध्रुवः ८८ परा ऋद्धिर्विभूतिरस्येति परर्द्धिः ८९ अनन्याधीनसिद्धित्वा
त्परमस्पष्टः ९० परानन्दैकरूपत्वात्तुष्टः ९१ सर्वसंपूर्णत्वात्पुष्टः ९२ ईक्षणं दर्शनं यस्य शुभं
शुभकरं मोक्षदं भौंदं सर्वसंदेहविच्छेदकारणं हृदयग्रन्थिविच्छेदकरं सर्वकर्मणां क्षपणं॰
मविद्यायाश्च निवर्तकं स शुभेक्षणः ९३ रामो विरामो विरजो मार्गो नेयो नयोऽनयः वीरः
शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ५६ रमन्ते नित्यानन्दलक्षणेऽस्मिन्योगिन इति रामः॰
स्वेच्छया रमणीयं वपुर्वहन्वा रामः ९४ विरामोऽवसानं प्राणिनामस्मिन्निति विरामः ९५ वि

गतेरजो यस्य विषयसेवायां नास्तीति रागः स्वेच्छया रमणीये वपुर्वहन् रमतीति विरजः ९६ पवि
हित्वामृतत्वाय कल्पते मुमुक्षवः सर्व एव यत्नायति श्रुतेः ९७ मार्गेण सम्यक्कृत्वा
नेन जीवः परमात्मतया नीयत इति नेयः ९८ नयतीति नयो नेता मार्गो नेयो नय इति त्रिरूपः
कल्पते ९९ नास्य नेता विद्यत इत्यनयः ४०० इति नाम्नां चतुर्थं शतं विवृतं ४ युगावर्त्ताशिख
ण्डी प्राणदः वायुवाहनः जनेश्वरः अहः लक्ष्मीवान् वेगवान् विक्रान्तो नष्टः १ विक्रमशा
लित्वाद्वीरः १ शक्तिमतां विरिंच्यादीनामपि शक्तिमत्त्वात् शक्तिमतां श्रेष्ठः २ धारणात् धर्मः
अन्येषां धर्म इति श्रुतेः धर्मैराराध्यत इति वा धर्मः ३ श्रुतयः स्मृतयश्च यस्याज्ञाभूताः स एव
धर्मविदामुत्तम इति धर्मविदुत्तमः ४ ५५ वैकुंठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः हिर
ण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ५२ विविधा कुंठा गतिप्रतिहतिर्विकुंठा यः कर्त्ता वैकुंठः १
जगदारंभे विश्लिष्टानि भूतानि परस्परं संश्लेषयंस्तेषां गतिं प्रतिबध्नातीति मया संश्लेषिता
भूमिरद्भिर्व्योम च वायुना वायुश्च तेजसा सार्द्धं वैकुंठत्वं ततो मम नित्यात पर्वणि ५ यत्पूर्वो
स्मात्सर्वस्मात्सर्वान्पाप्मनः औषत्तस्मात्पुरुष इति श्रुतेः सर्वस्मात्पुरा सर्वपापस्य सादनात्

स॰ टी॰ २॰
30

पुरुषः पुरिशयनात्स पुरुषः स वा अयं पुरुषः सर्वासु पूर्षु शयो न इति श्रुतेः ६ प्राणितीति क्षेत्रज्ञरूपेण प्राणान्
नयन् चेष्टकत्वात्प्राणः चेष्टां करोति श्वसनरूपेण निविलम्बुराणः ७ एवं पञ्चात्मना प्राणान्प्रलया
द्यतीति प्राणदः ८ प्रणौतीति प्रणवः तस्मादोमिति प्रणौतीति श्रुतेः प्रणम्यत इति वा प्रणवः
प्रणमतीह यं वेदास्तस्मात्प्रणव उच्यत इति सनत्कुमारवचनात् ९ प्रपञ्चरूपेण विस्तृतत्वात्पृथुः
१० हिरण्यगर्भसंभूतिकारणं हिरण्मयमण्डं यद्वीर्यसंभूतं तन्नदस्य गर्भ इति हिरण्यगर्भः ११ त्रिद
श शत्रून्हन्तीति शत्रुघ्नः १२ कारणत्वेन सर्वकार्याणां व्यापनाद्व्याप्तः १३ वाति गन्धं करोतीति
वायुः पुण्यो गन्धः पृथिव्यां चेति भगवद्वचनात् १४ अधो न क्षीयते जातु यस्मात्तस्मादधोक्षज इति
योगपर्वणि द्यौरन्तरिक्षं पृथिवी चाधस्तयोर्यस्मादजायत मध्ये वैराजरूपेणेति वाधोक्षजः १५ ५॰
ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ५८ काला
त्मना ऋतुशब्देन लक्ष्यत इति ऋतुः १६ शोभनं निर्वाणफलदर्शनं ज्ञानमस्येति ईक्षणे पद्मपत्रा॰
यतेऽस्येति वा सुखेन दृश्यते भक्तैरिति वा सुदर्शनः १७ कलयति सर्वमिति कालः कालः कलयताम
हमिति भगवद्वचनात् १८ परमे प्रकृष्टे स्वे महिम्नि हृदयाकाशे स्थातुं शीलमस्येति परमेष्ठी पर

२:

मेधीविराजत इति मंत्रवर्णात् १९ शरणमार्त्तिभिः परितो गृह्यते सर्वगतत्वात्सरितो ज्ञायत इति वा एवं पुष्पा
दिकं भक्तैरर्पितं गृह्णातीति वा परिग्रहः २० सूर्यादीनां भयहेतुत्वादुग्रः भीषास्माद्वातः पवत इति
श्रुतेः २१ संवसन्ति भूतान्यस्मिन्निति संवत्सरः २२ जगद्रूपेणावर्द्धमानत्वात्सर्वकर्माणि क्षिप्रं कु
रोतीति वा दक्षः २३ संसारसागरे क्षुत्पिपासादिभिः षड्भिस्तरंगैरविद्यादिभिर्महाक्लेशैर्मदादि
भिरुपक्लेशैश्चावृतानां तेषां विश्रान्तिं काङ्क्षिणां विश्राममेतेषां करोतीति विश्रामः २४ विश्वस्मा
द्दक्षिणः शक्तो विश्वेषु कर्मसु दाक्षिण्याद्वा विश्वदक्षिणः २५ ५८ विस्तारः स्थावरः स्थाणुः प्रमा
णं बीजमव्ययं अर्थोनर्थो महाकोशो महाभोगो महाधनः ५९ विस्तीर्यन्ते समस्तानि जगन्ति
यस्मिन्निति विस्तारः २६ स्थितिशीलः स्थावरः स्थितिशीलानि पृथिव्यादीनि तिष्ठन्त्यस्मिन्नि
ति स्थाणुः स्थावरश्चासौ स्थाणुश्चेति स्थावरस्थाणुरित्येकं पदं २७ संविदात्मना प्रमाणं २८ अ
न्यथाभावव्यतिरेकेण कारणमिति बीजमव्ययं सविशेषणमेकं नाम २९ सुखरूपत्वात्सर्वैरर्थ्य
त इत्यर्थः ३० न विद्यते प्रयोजनमाप्तकामत्वादस्येत्यनर्थः ३१ महान्तः कोशा अन्नमयाद्या आच्छा
दका अस्येति महाकोशः ३२ महान्भोगः सुखरूपमस्येति महाभोगः स्वरूपोस्येति वा महाभोगः ३३

स.टी. महद्रोगभाधनलक्षणं धनमस्येति महाधनः २४ ५९ अनिर्विण्णः स्थविष्ठोभूर्द्धर्मयूपोमहामखः
३१ ने नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ६० अवाप्तकामत्वान्न निर्वेदोऽस्य विद्यत इत्यनिर्विण्णः २५
31 वैराजरूपेण स्थविष्ठः अग्निर्मूर्द्धा चक्षुषी चंद्रसूर्यावित्यादिश्रुतेः २६ अजन्मा भूः अथवा
भूःसत्तासर्वपदार्थानां वा वेदिकापमहीवा २७ यूपवत्समाराधनात्मका धर्मास्तत्रबध्यन्त इति
धर्मयूपः २८ यस्मिन्नर्पितानमखाय ज्ञानिर्वाणलक्षणं फलं प्रयच्छन्तो महान्तो जायन्ते स महामखः
२९ नक्षत्रतारादैः सार्द्धं चंद्रसूर्यादयो ग्रहाः वायुपाशमयैर्बंधैः निबद्धा ध्रुवसंज्ञिते सज्योतिषां चक्र
भ्रामयन्तारामयस्य शिशुमारस्य पुच्छदेशे व्यवस्थितो ध्रुवः तस्य शिशुमारस्य ज्योतिश्चक्रस्य नेमिव
त्प्रवर्तको हृदये स्थितो विष्णुरिति कथितो नक्षत्रनेमिः शिशुमारवर्णने विष्णुर्हृदयमिति श्रु
तेः ४० चंद्ररूपेण नक्षत्री नक्षत्राणामहं शशीति भगवद्वचनात् ४१ सर्वकार्येषु समर्थः क्षमः क्ष
मत इति वा क्षमः क्षमया पृथिवीसम इति वाल्मीकिवचनात् ४२ सर्वविकारेषु क्षपितेषु स्वात्म
नास्थित इति क्षामः ४३ सृष्ट्याद्यर्थं सम्यगीहत इति समीहनः ४४ ६० यज्ञ इज्यो महेज्यश्च क्रतुः स
त्रंसतांगतिः सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमं ६१ सर्वयज्ञस्वरूपत्वाद्यज्ञः ४५ यष्टव्यो
३१

णयमेवेतीज्यः येयजंतिमखैः पुण्यैः देवतानिपितॄनपि आत्मानमात्मनानित्यंविष्णुमेवयजंतिते
इतिहरिवंशे ४६ सर्वासुदेवतास्वयष्टव्यासुप्रकर्षेण यमेवयष्टव्योमोक्षफलप्रदातृत्वादि
तिमहेज्यः ४७ यूपसंहितोयज्ञःक्रतुः ४८ आत्मनोपायिचोदनालक्षणंसत्रंसतस्त्रायतइतिवा
४९ सतांमुमुक्षूणांनान्यागतिरितिसतांगतिः ५० सर्वेषांप्राणिनांकृताकृतंसर्वंपश्यतीति
सर्वदर्शी ५१ स्वभावेनविमुक्तआत्मावात्माचेतिविमुक्तात्मा विमुक्तश्चविमुच्यतइतिश्रुतेः
५२ सर्वश्चासौज्ञश्चेतिसर्वज्ञः ५३ सर्वंयदयमात्मेतिश्रुतेः ५३ ज्ञानमुत्तममित्येतत्सविशेष
णमेकंनाम ज्ञानंप्रकृष्टमनवच्छिन्नंसर्वसाधकमिति ज्ञानमुत्तमंब्रह्म सत्यंज्ञानमनंतमिति
श्रुतेः ५४ ६१ सुव्रतःसुमुखःसूक्ष्मःसुघोषःसुखदःसुहृत् मनोहरोजितक्रोधोवीरबाहु
र्विदारणः ६२ शोभनंव्रतमस्येतिसुव्रतः सकृदेवप्रपन्नायतवास्मीतिचयाचते अभयंस
र्वदातस्मैददाम्येतद्व्रतंममेतिरामायणेश्रीरामवचने ५५ सुशोभनंमुखमस्येतिसुमुखः प्र
सन्नवदनेचारोपज्ञपञ्चायनेत्वणमितिविष्णुपुराणेवनवासेसमुखत्वाद्दाशरथीरामः
सुमुखः योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मैइतिश्रुतेः ५६ शब्दादिस्थूल

स.टी.
३२
३४

कारणरहितत्वात् शब्दादयोस्याकाशादीनामुत्तरोत्तरस्थूलत्वकारणानि तदभावात्सूक्ष्मः सर्वा
नेतस्सूक्ष्ममितिश्रुतेः ५७ शोभनोघोषोवेदात्मकोस्येतिमेघगंभीरघोषत्वाद्वासुघोषः ५८ सुहृ
तानांसुखंखण्डयतीतिवासुखदः ५९ प्रत्युपकारनिरपेक्षतयोपकारित्वात्सुहृत् ६० निरति
शयानंदरूपत्वात्मनोहरतीतिमनोहरः यो वै भूमा तत्सुखंनाल्पेसुखमस्तीत्यादिश्रुतेः ६१
जितःक्रोधोयेनसजितक्रोधः वेदमर्यादांस्थापयन् असुरान्हंतिनतुकोपवशात् ६२ विक्र
मशालीबाहुरस्येतिवीरबाहुः ६३ अधार्मिकान्विदारयतीतिविदारणः ६४ ६२ स्वापनः१
स्ववशोव्यापीनैकात्मानैककर्मकृत् वत्सरोवत्सलोवत्सीरत्नगर्भोधनेश्वरः ६३ स्वपयन् आ
त्मतत्वबोधविधुरान्माययाकुर्वन्स्वापनः ६५ स्वतंत्रःस्ववशः जगदुत्पत्तिस्थितिलयहेतुत्वात्१
६६ आकाशवत्सर्वगतत्वात्व्यापी ६७ जगदुत्पत्त्यादिभिन्ननिमित्तशक्तिभिर्विभूतिभिरने
कधातिष्ठन्नैकात्मा ६८ जगदुत्पत्तिसंपत्तिविपत्तिभक्तकर्माणिकरोतीतिनैककर्मकृत् ६९१
वसत्यत्राखिलमितिवत्सरः ७० भक्तस्नेहत्वाद्वत्सलः ७१ वत्सानांपालकत्वाद्वत्सीतस्यजग
त्पितुःवत्सभूताःप्रजाइतिवावत्सी ७२ रत्नानिगर्भभूतान्यस्येतिसमुद्रोरत्नगर्भः ७३ धनानामी

ग्रोधवेश्वरः ७४ ९३ धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरं अविज्ञाता सहस्रांशुर्विधाता कृत
लक्षणः ९४ धर्मान् गोपयतीति धर्मगुप् ७५ धर्माधर्मविहीनोपि धर्ममर्यादास्थापनार्थं धर्ममे
व करोतीति धर्मकृत् ७६ धर्मान्धारयतीति धर्मी ७७ अवितथं परं ब्रह्म सत् सदेव सोम्येदमिति श्रु
तेः ७८ अपरं ब्रह्म असत् वाचारंभणं विकारो नामधेयमिति श्रुतेः ७९ क्षरं सर्वाणि भूतानि ८०
कूटस्थं कारणमक्षरं द्वाविमौ पुरुषौ लोके इति भगवद्वचनात् ८१ आत्मनि कर्तृत्वादि ज्ञानं क
ल्पितमिति तद्वासनावकुंठितो जीवो ऽविज्ञाता ८२ आदित्यादिगतानंशेशेवोसि वेत्ययमेव सहस्रांशुः
सहस्रांशुः येन सूर्यस्तपति तेजसेद्ध इति श्रुतेः यदादित्यगतं तेज इत्यादिस्मृतेश्च ८३ विशेषेण
शेषदिग्गजभूधरान् समस्तभूतानां धातॄन् दधातीति विधाता ८४ नित्यनिष्पन्नचैतन्यस्वरूपता
कृतलक्षणः कृतानि लक्षणानि शास्त्राण्यनेनेति वा वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्द
नादिति च वत्स्यानि सजातीयव्यवच्छेदकं लक्षणं सर्वभावानां कृतमनेनेति वा आत्मनः श्रीवत्सल
क्षणं वक्षसि येन कृतमिति वा कृतलक्षणः ८५ ९४ भगस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्व
रः आदिदेवो महादेवो देवेशो देवभृद्गुरुः ९५ गभस्तिचक्रमस गभस्तिचक्रमध्यवर्तिनः सूर्या

स.टी. २४ स्मृत इति गभस्तिनेमिः ८६ सत्त्वं गुणं प्रकाशकं प्रधानेनाधितिष्ठतीति सर्वप्राणिष्वधितिष्ठती
ति वा सत्त्वस्थः ८७ विक्रमशालित्वात्सिंहः नरशार्दूलोपेन सत्वभामाभामेति वद्धान्तसिंहः ८८ भूता
33 34 नां महानीश्वरः भूतेन सत्येन एव परमात्मा महानीश्वर इति वा भूतमहेश्वरः ८९ सर्वभूतानां आ
दीयते नेतेत्यादिः स चासौ देवश्चेत्यादिदेवः ९० सर्वात्मभावान्परित्यज्यात्मज्ञानयोगैश्वर्ये महति
महीयते तस्मादुच्यते महादेव इति स्मृते महादेवः ९१ देवानां प्रधानत्वाद्देवेशः ९२ देवान्बिभ
र्तीति देवभृत् शक्रस्तस्यापि पितामसितेति देवभृद्गुरुः देवानां भरणात्सर्वविधानाच गरणाद्धा देव
भृद्गुरुः ९३ ९५ उरगो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षि
णः ९६ जन्मसंसारवेधनादुरगतीति उरगः विश्वस्मादुत्कृष्ट इति वा उरगः ९४ गवां पाल
नात् गोपवेषधरो गोपतिर्गोमहीनराणां पतिर्वा ९५ समस्तभूतानि पालयन् गोप्ता ९६ न
कर्मणा न ज्ञानकर्मभ्यां वा गम्यत इति ज्ञानगम्यः ९७ कालेनापरिच्छिन्नत्वात् पुरातनः ९८
शरीरारंभकभूतानां भरणात्प्राणरूपधरः शरीरभूतभृत् ९९ पालकत्वात् भोक्ता परमानंद
संदोहसंभोगाद्वा भोक्ता ५०० इति नाम्नां पञ्चमं शतं विवृतं ५ वीरः हिरण्यगर्भः उग्रः स्त्र।

२२

नर्थः नन्दी सर्वदर्शी मनोहरः वत्सलः अन्तरः महादेवः १० कपिर्वराहः इन्द्रश्चेति कपीन्द्रो वराहमू
र्तिः कपीनामिन्द्रः कपीन्द्रो राघवो वा १ भूरयो यज्ञदक्षिणा धर्ममर्यादादर्शी यत्नो यज्ञं कुर्वतो १
सा विद्यत इति भूरिदक्षिणः १९९ सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः विनयो जयः स
त्यसंधो दाशार्हः सात्वतांपतिः ६० सोमं पिबति सर्वयज्ञेषु यष्टव्यत्वात्देवतारूपेणेति सो १
मपः २ स्वात्मामृतरसं पिबन्नमृतपः अमृतमसुरैर्ह्रियमाणं रक्षित्वा देवान्पाययित्वा स्वय
५५ मपिबदिति वामृतपः ४ सोमरूपेणौषधीः पोषयन्सोमः उमया सहित इति वा ५ पुरून्बहू
न् जयतीति पुरुजित् ६ विश्वरूपत्वात्पुरुः उत्कृष्टत्वाच्च सत्तमः पुरुश्चासौ सत्तमश्चेति पुरु
सत्तमः ७ विनयं दण्डं करोति दुष्टानामिति विनयः ८ समस्तानि भूतानि जयतीति जयः ९
सत्याः संधाः संकल्पा अस्येति सत्यसंधः सत्यसंकल्प इति श्रुतेः १० दाशा दानं तदर्हतीति
दाशार्हः दाशार्हस्य कुलोद्भवत्वाद्वा ११ सात्वतं नाम तन्त्रं तत्करोति तदाचष्ट इति णिचि क्विपि कृते
क्विप् चेति क्विप् प्रत्यये णेरनिटीति णिलोपे च कृते पदं सात्वतं तेषां पतिर्योगक्षेमकर इ
ति सात्वतांपतिः १२ ६० जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः अम्भोनिधिरनन्तात्मा

नृ।

स.टी. होदधिशयोऽन्तकः १२ प्राणान्लोकान्तररूपेण धारयन्जीव उच्यते १३ विनयित्वं साक्षात्पश्यतीति
२४ विनयिता साक्षी यद्वा नयतेर्गतिर्वा विनो रूपं विनयिता असाक्षी असाक्षाद्द्रष्टा आत्मनो निरिक्षि
वत्त्वेन पश्यतीति १४ मुक्तिं ददातीति मुकुंदः वर्णान्तरसाम्यान्निरुक्तिवचनाद्विहकृतो मकुंद
इति निरुक्तिः १५ अमिता अपरिच्छिन्ना विक्रमास्त्रयः पादविक्षेपा अस्य अमितः विक्रमः शौ
र्यमस्येति वा मितविक्रमः १६ अंभांसि देवादयो यस्मिन्निधीयन्त इत्यंभोनिधिः तानि ह वा ए
तानि चत्वार्यंभांसि देवा मनुष्याः पितरोऽसुरा इति श्रुतेः सागरो वा सरसामस्मि सागर इति
भगवद्वचनात् १७ देशतः कालतः वस्तुतश्चापरिच्छिन्नस्वरूपत्वादनंतात्मा १८ संहृत्य सर्व
भूतानि एकार्णवं जगत्कृत्वाधिशेते महोदधिमिति महोदधिशयः १९ अंतं करोति भूतानां
नामित्यंतकः २०·१८ अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः आनंदो नंदनो नंदः सत्यध
र्मा त्रिविक्रमः १९ आद्विस्मोरजायतेति कामोऽजः २१ महाजातदर्हत्वान्महार्हः २२ स्वभावेनै
वाभाव्यो नित्यनिष्पन्नरूपत्वादिति स्वाभाव्यः २३ जितान्यमित्राण्याभ्यंतराणि रागद्वेषादयो वा बा
रावणादयश्च येनासौ जितामित्रः २४ स्वात्मस्वरसास्वादनान्नित्यं प्रमोदते ध्यायिनो ध्यानमा २४

त्रेणप्रमोदं कुरुत इति वा प्रमोदनः २५ आनंदस्वरूपमस्येति आनंदः एतस्यैवानंदस्यान्यानि भूता
नि मात्रामुपजीवंतीति श्रुतेः २६ नंदयतीति नंदनः २७ सर्वाभिरुपपत्तिभिः समृद्धो नंदः सुखं वै
षयिकं नास्य विद्यत इत्यनंदो वा यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति श्रुतेः २८ सत्याधर्मज्ञाना
दयोस्येति सत्यधर्मा २९ त्रयो विक्रमः त्रिषु लोकेषु क्रांता यस्य स त्रिविक्रमः त्रीणि पदानि विच
क्रम इति श्रुतेः त्रयो लोकाः क्रांता येनेति वा त्रिरित्येव त्रयो लोकाः कीर्तिताः मुनिसत्तम क्रम
ते तांस्त्रिधा सर्वांस्त्रिविक्रमोसि जनार्दनेति हरिवंशे ३० महर्षिः कपिलाचार्यः कृतज्ञो मेदि
नीपतिः त्रिपदस्त्रिदशाध्यक्षो महाशृंगः कृतांतकृत १ महर्षिः कपिलाचार्यः इति सविशे
षणमेकं नाम महांश्चासावृषिश्चेति महर्षिः कृत्स्नस्य वेदस्य दर्शनात् अन्ये त्वेवं द्वे केदेशद
र्शिनावृषयः कपिलश्चासौ सांख्यस्य शुद्धात्मतत्त्वविज्ञानस्याचार्यश्चेति कपिलाचार्यः शुद्धात्म
तत्त्वविज्ञानं सांख्यमित्यभिधीयत इति व्यासस्मृतेः ऋषिं प्रसूतं कपिलं महांतमिति श्रुतेः
३१ कृते कार्यं जगत्तज्ज्ञ आत्मा कृतं च ज्ञश्चेति कृतज्ञः ३२ मेदिन्याः पतिर्मेदिनीपतिः ३३ त्रीणि
पदान्यस्येति त्रिपदः ३४ गुणावेशेन संजाता स्थितोदशावस्था जाग्रदादयस्तासामध्यक्ष इति

त्रिदशाध्यक्षः ३५ मत्स्यादिरूपी महाशृंगः ३६ कृतेन स्वाने संहारं करोतीति कृतं न कृतं न कृतांतं मरणं संहृत्य कृतंती-
तिवा ३७ ७१ महावराहो गोविंदः सुषेणः कनकांगदी गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ७१
महांश्चासौ वराहश्चेति महावराहः ३८ गोभिर्वाणीभिर्विद्यत इति वेदांतवाक्यैरिति वा गोविंदः गो-
भिरेव यतो वेद्यो गोविंदः समुद्राद्धृतद्गतिश्री विस्तृतिलके ३९ शोभना सेना गणात्मका यस्य स सु-
षेणः ४० कनकेन निर्मितमंगदं कनकांगदं तद्विद्यते यस्येति कनकांगदी ४१ रहस्योपनिषद्वेद्य-
त्वाद्गुह्यो हृदयाकाशे निहितत्वाद्वा गुह्यः ४२ ज्ञानैश्वर्यबलादिभिर्गंभीरो गभीरः ४३ दुःप्रवे-
शत्वाद्गहनः अवस्थात्रयभावाभावसाक्षित्वाद्गहनो वा ४४ वाङ्मनसयोरगोचरत्वाद्गुप्तः एवं स-
र्वेषु भूतेषु गूढोत्मा न प्रकाशते इति श्रुतेः ४५ मनस्तत्त्वात्मकं चक्रं बुद्धितत्त्वात्मिकां गदां धारयन्
लोकरक्षार्थं चक्रगदाधरः ४६ ७१ वेधाः स्वांगोजितः कृष्णो दृढः संकर्षणोच्युतः वरुणो वा-
रुणो वृक्षः पुष्कराक्षो महामनाः ७२ विधाता वेधाः एषोदरादित्वात्साधुत्वे ४७ स्वयमेव कार्यस्य
करणांगं सहकार्यस्येति स्वांगः ४८ न केनाप्यवतारेषु जित इत्यजितः ४९ कृष्णद्वैपायनः कृष्णः
कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुं को ह्यन्यः पुंडरीकाक्षान्महाभारतकृद्भवेदिति विष्णुपुरा- ३५

णवचनात् ५० स्वरूपसामर्थ्यादेः अच्युत इति नामैकं सविशेषणं ५१ स्वरश्मीनां संवरणात्स्वायंग
तः सूर्यो वरुणः इमे मे वरुणात् इति मैत्रेवरुणात् ५२ वरुणस्यापत्यं वशिष्ठोऽगस्त्यो वा वारुणः ५३ वृ
क्षवदचलनया स्थितः इति वृक्षः वृक्षवल्लयोर्विनिष्ठत्येक इति श्रुतेः ५५ व्याप्य मर्यादत्तेष्ठीतोः
पुष्करोपपरदात्दर्पणप्रत्यये सति पुष्कराक्षः हृदयपुण्डरीके चिंतितः स्वरूपेण प्रकाशत इति वा पुष्क
राक्षः ५६ सृष्टिस्थित्यंतकर्माणि मनसैव करोतीति महामनाः मनसैव जगत्सृष्टिं संहारं च करो
ति यः इति विष्णुपुराणे ५७ ॥ भगवान् भगहानंदी वनमाली हलायुधः आदित्यो ज्योतिरादित्यः
सहिष्णुर्गतिसत्तमः ७३ ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः वैराग्यस्याथ मोक्षस्य षण्णां भग
इतीरणा सोऽस्यास्तीति भगवान् ऽस्येति प्रलये चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स वा
च्यो भगवानिति विष्णुपुराणवचनात् ५८ ऐश्वर्यादिकं संहारसमये हन्तीति भगहा ५९ सुखस्वरूप
त्वादानंदी सर्वाभिः संपत्तिभिः समृद्धत्वाद्वानंदी वा ६० भूततन्मात्रनिर्मितां वैजयंत्याख्यां वनमा
लां वहन् वनमाली ६१ हलमायुधमस्यास्तीति हलायुधो बलभद्राकृतिः ६२ आदित्यां कश्यपा
द्वामनरूपेण जात इति आदित्यः ६३ ज्योतिषि सावित्रे मंडले स्थितो ज्योतिरादित्यः ६४ द्वंद्वानि

शीतोस्याहीतिसंहृतइतिसहिष्णुः ६५ गतिस्थासौसत्तमश्चेतिगतिसत्तमः ६६ ०३ सुधन्वाखण्डपरशुर्दा
रुणोद्रविणप्रदः दिवस्पृक्सर्वदृग्व्यासोवाचस्पतिरयोनिजः ०४ शोभनमिन्द्रियादिमयंशार्ङ्गंध
नुरस्यास्तीतिसुधन्वा ६७ शत्रूणांखण्डनात्खण्डः परशुरस्यजामदग्न्याकृतेरितिखण्डपरशुः अखं
डपरशुरस्यवेति ६८ सन्मार्गविरोधिनांदारुणत्वाद्दारुणः ६९ द्रविणंवाञ्छितंभक्तेभ्यःप्रद
दातीतिद्रविणप्रदः ७० दिवःस्पर्शनाद्दिवस्पृक् ७१ सर्वदृशांसर्वज्ञानानांविस्तारकत्वाद्व्यासः स
र्वदृग्व्यासः अथवासर्वंचतद्दृक्चसर्वदृक्सर्वाकारंज्ञानंसर्वस्यदृष्टत्वाद्वासर्वदृक् ऋग्वेदादिभेदेन
चतुर्धाव्यस्तावेदाः आद्योवेदएकविंशतिधाकृतः द्वितीयएकोत्तरशतधाकृतः सामवेदःस
हस्रधाकृतः अथर्वणवेदोनवधाशाखाभेदेनकृतः अन्यानिपुराणानिव्यस्तान्यनेनेतिव्यासः
७२ ब्रह्मावाचस्पतिरयोनिज इतिसविशेषणमेकंनामवाचोविद्यायाःपतिर्वाचस्पतिःयोन्यांनजा
यतइत्ययोनिजः ७३ ०४ त्रिसामासामगःसामनिर्वाणंभेषजंभिषक् संन्यासकृच्छमःशान्तो
निष्ठाशान्तिःपरायणः ०५ वेदव्रतसमाख्यातैस्त्रिभिःसामभिःस्तुतस्त्रिसामा ७४ सामगायती
तिसामगः ७५ वेदानांसामवेदोस्मीतिभगवद्वचनात्सामवेदःसाम ७६ सर्वदुःखोपशमलक्षण

णपरमात्मनेदत्तरूपेनिर्वाणं ७७ संसाररोगस्यौषधंभेषजं ७८ संसाररोगमोक्षकारिणींपराविद्यामुप
दिदेशगीतास्वितिभिषक् ७९ मोक्षाश्रमेचतुर्थेकृतवानितिसंन्यासकृत् ८० संन्यासिनांप्र
धान्येनज्ञानसाधनंशममाचष्टइतिशमः तत्करोतितदाचष्टइतिणिचिपचाद्यचिकृतेरूप
शमयितेतिवाशमः ८१ विषयसुखेष्वसंगतयाशान्तः निष्क्रियंनिष्कलंशान्तमितिश्रुतेः ८२
प्रलयेनितरांतत्रैववर्तिष्ठंतिभूतानीतिनिष्ठा ८३ समस्ताविद्यानिवृत्तिःशान्तिःसाब्रह्मैव ८४
परमुत्कृष्टमयनंस्थानंपुनरावृत्तिशंकारहितंपरायणंपुल्लिंगपाठेबहुव्रीहिः ८५ १५
शुभांगःशान्तिदःस्रष्टाकुमुदःकुवलेशयः गोहितोगोपतिर्गोप्तावृषभाक्षोवृषप्रियः १६
रागद्वेषादिनिर्मोक्षलक्षणांशान्तिंददातीतिशान्तिदः ८७ सर्गादौसर्वभूतानिससर्जेतिस्रष्टा
८८ कौमेदिन्यांमोदतइतिकुमुदः ८९ कोःक्षितेर्वलनात्संवलनात्कुवलंजलंतस्मिन्शेषोदरेशे
तइतिकुवलेशयः कुवलेबदरीफलेतस्यमध्येशेतेतद्वत्कः सोपितस्यविभर्तिरितिवाहरिःकुव
लेशयः कौभूम्यावलतिसंश्रीयतेसर्पोणमदरःकुवलतस्मिन्शेषोदरेशेतेइतिकुवलेशयः ९०
गवांहितस्यार्थेगोवर्द्धनेधृतवानितिगोभ्योहितोगोहितः गोभूमेर्भारावतारणेच्छयाशरीरग्रहणे

स.टी. ३८
37

कुर्वन् गोहितः ९१ गोर्भूम्याः पतिर्गोपतिः ९२ रक्षको जगत इति गोप्ता स्वात्मानं स्वमायया संवृणोती
ति वा गोप्ता ९३ सकलान्कामानभिवर्षके ईक्षणी अस्येति वृषभाक्षः वृषो धर्मो दृष्टिरस्येति वा वृषभा
क्षः ९४ वृषो धर्मः प्रियोऽस्येति वृषप्रियः ९५ ७६ अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ७७ देवासुरसंग्रामान्न निवर्तत इत्यनिवर्ती वृ
षप्रियत्वाद्धर्माच्च न निवर्तत इति वा ९६ स्वभावतो विषयेभ्यो निवृत्त आत्मा यस्येति निवृत्तात्मा ९७
संहारसमये विस्तृतं जगत्सूक्ष्मरूपेण संक्षिपत इति संक्षेप्ता ९८ उपात्तस्य संरक्षणं करोतीति
क्षेमकृत् ९९ नामस्मृतिमात्रेण पापावपनाच्छिवः १०० इति नाम्नां षष्ठं शतं विवृतम् ० ६ ॥ कपी
न्द्रः दाशार्हः महार्हः महर्षिः कनकाङ्गदी हृष्टः वनमाली हविस्स्रुक् श्यामः गोहितः १ श्रीवत्सल
क्षणं चिह्नमस्य वक्षसि स्थितमिति श्रीवत्सवक्षाः ॥ अस्य वक्षसि श्रीरनपायिनी वसतीति
श्रीवासः ३ अमृतमथने सर्वान् सुरान् विहाय श्रीरेनं वरयामासेति श्रीपतिः श्रीः परा शक्तिः
तस्याः तस्याः पतिरिति वा परास्य शक्तिर्विविधैव श्रूयत इति श्रुतेः ४ विरिञ्च्यादीनां श्रीमतां ऋ
ग्यजुस्सामलक्षणा श्रीः सा येषां सन्ति तेषां प्रधानः श्रीमतां वरः ऋचः सामानि यजूंषि ता हि

श्रीरस्ता सततो इति श्रीमते: ४ ॥ श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः श्रीधरः
श्रीकरः श्रेयः श्रीमांल्लोकत्रयाश्रयः ७८ श्रियं ददाति भक्तानाम् इति श्रीदः ५ श्रियईशः ।
श्रीशः ६ श्रीमत्सु नित्यं वसतीति श्रीनिवासः श्रीशब्देन श्रीमन्तो लक्ष्यन्ते ७ सर्वशक्तिमये स्मि
न्नखिलाः श्रियो निधीयन्त इति श्रीनिधिः ८ कर्मानुरूपेण विविधाः श्रियः सर्वभूतानां ।
विभावयतीति श्रीविभावनः ९ सर्वभूतानां जननीं श्रियं वक्षसि वहन् श्रीधरः १० स्मरतां
स्तुवताम् अर्चयतां भक्तानां श्रियं करोतीति श्रीकरः ११ अनपायिसुखावाप्तिलक्षणं श्रेयः
तत्परस्यैव रूपम् इति श्रेयः १२ श्रियो अस्य सन्तीति श्रीमान् १३ त्रयाणां लोकानाम् आश्रयत्वाल्लो
कत्रयाश्रयः १४ ७८ स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः विजितात्मा विधेयात्मा ।
सत्कीर्तिश्छिन्नसंशयः ७९ शोभने पुण्डरीकाभे अक्षिणी अस्येति स्वक्षः १५ शोभनान्यङ्गा ।
न्यस्येति स्वङ्गः १६ एक एव परानन्दः उपाधिभेदाच्छतधा विभिद्यत इति शतानन्दः १७ परमानन्दवि
ग्रहो नन्दिः १८ ज्योतिर्गणानाम् ईश्वरो ज्योतिर्गणेश्वरः तमेव भान्तम् अनुभाति सर्वं तस्य भासा
सर्वमिदं विभातीति श्रुतेः १९ विजितो आत्मा येनाविजितात्मा २० न केनापि विधेय आत्मा

सत्त्वमस्येत्यविधेयात्मा २१ सतीश्चावितथाकीर्तिरस्येति सत्कीर्तिः २२ करतलामलकवत्सर्वं सा
क्षात्कृतवतः क्वापि संशयो नास्तीति छिन्नसंशयः २३ ७९ उदीर्णः सर्वतश्चक्षुरनीशः शाश्वत
स्थिरः भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ८० सर्वभूतेभ्यः समुत्कृष्टत्वादुदीर्णः २४
सर्वतः सर्वं स्वचैतन्येन पश्यतीति सर्वतश्चक्षुः २५ न विद्यतेस्येश इत्यनीशः न तस्येशः कश्च
नेति श्रुतेः २६ शश्वद्भवन्नपि न विक्रियां कदाचिदुपैतीति शाश्वतः स्थिर इति नामैकं २७ ल
कां प्रति मार्गमन्वेषमाणः समागरोपान्तभूमौ शेते इति भूशयः २८ स्वेच्छयावतारैर्बहुभिर्भू
मिं भूषयन्भूषणः २९ भवने सत्ता विभूतिर्वा समस्तविभूतीनां कारणत्वाद्वा भूतिः ३० वि
गतः शोकोस्य परानंदैकरूपत्वादिति विशोकः ३१ शोकं नाशयतीति शोकनाशनः ३२ ८०
अर्चिष्मानर्चितः कुंभो विशुद्धात्मा विशोधनः अनिरुद्धोप्रतिरथः प्रद्युम्नोमितविक्रमः ८१
अर्चिषं तेजोपदीयेनार्चिषा चंद्रसूर्यादयः स एवमस्यार्चिष्मान् ३३ सर्वलोकार्चितैर्ब्रह्मादिभिः
अर्चितस्त्वर्चितः ३४ कुंभवदस्मिन्सर्वं प्रतिष्ठितमिति कुंभः ३५ गुणत्रयातीततया विशु
द्ध आत्मास्यात्मा चेति विशुद्धात्मा ३६ स्मृतिमात्रेण पापानां क्षपणाद्विशोधनः ३७ चतुर्षु

ग्रहेष्वनिरुद्धः ४८ अतिपन्नोऽस्मिन विघत इत्यप्रतिरथः ४९ प्रद्युम्नं द्रविणमस्येति प्रद्युम्नः
चतुर्व्यूहात्मवा ५० अमितो विक्रमोऽस्येत्यमितविक्रमः ५१ ८१ कालनेमिनिहा वीरः शूरः शौ
रिर्जनेश्वरः त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ८२ कालनेमिनं मल्लं रे निर्जघाने
ति कालनेमिनिहा ५२ वीरः शूरः ५३ शूरकुलोद्भवत्वात् शौरिः ५४ शूरजनानां वासुदेवादीनां
शौर्यातिशयेनेश्वर इति शूरजनेश्वरः ५५ त्रयाणां लोकानामन्तर्यामितयात्मेति त्रिलोकात्मा
त्रयो लोका अस्मात्परमार्थतो न भिद्यन्त इति वा ५६ त्रयो लोकास्तदाज्ञया स्वेषु कर्मसु वर्तन्त इति त्रि
लोकेशः ५७ केशसंज्ञिताः सूर्यादिसंक्रान्ता अंशवस्तद्वत्तया केशवः अंशवो ये प्रकाशन्ते मम
ते केशसंज्ञिताः सर्वज्ञाः केशवं तस्मान्मामाहुर्द्विजसत्तमाः इति भारते ब्रह्मा विष्णुः शिवाख्याः श
क्तयः केशिनस्तत्केशवस्तथा तल्ले इत्यादौ केशशब्दः शक्तिपर्यायत्वेन प्रयुक्तः को ब्रह्मेति
समाख्यातो ईशोऽहं सर्वदेहिनां आवां तवांगसंभूतौ तस्मात्केशवनामवानिति हरिवंशवच
नाद्वा केशवः ५८ केशिनामानमसुरं हतवानिति केशिहा ५९ सहेतुकं संसारं हरतीति ह
रिः ६० कामदेवः कामपालः कामी कान्तः कृतागमः अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः ८३ धर्म

स.टी
२९
39

द्विपुरुषार्थचतुष्टयं वांछद्भिः काम्यत इति कामः सम्यक्कामो देवस्येति कामदेवः ५१ कामिनो कामान्पा
लयतीति कामपालः ५२ पूर्णकामस्वभावत्वात्कामी ५३ अभिरूपतमे देहं वहन्कान्तः ५४ कृतः
आगमः श्रुतिस्मृत्यादिलक्षणो येन स कृतागमः ५५ इदं तदिति दृशो वेति निर्देष्टुं यत्र शक्यते न गु
णाद्यतीतत्वात् तदपमस्यानिर्देश्यवपुः ५६ रोदसी व्याप्य कान्तीरधिकाः स्थितास्येति विष्णुः ५७
गत्यादिमत्त्वाद्वीरः वी गति प्रजनकान्त्यसनखादनेष्विति धातुपाठात् ५८ देशतः कालतो व
स्तुतश्चापरिच्छिन्नोऽनन्तः ५९ यद्दिग्विजये प्रभूतं धनमजयत्तेन धनंजयोऽर्जुनः पाण्डवानां ध
नंजय इति भगवद्वचनात् ६० ८३ ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्द्धनः ब्रह्मविद्ब्राह्मणो
ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ८४ तपो वेदाश्च विप्राश्च ज्ञानं च ब्रह्मसंज्ञितं तेभ्यो हितत्वाद्ब्रह्मण्यः
६१ तपआदीनां कर्तृत्वाद्ब्रह्मकृत् ६२ ब्रह्मात्मना सर्वं सृजतीति ब्रह्मा ६३ बृहत्वाद्बृंहणत्वाच्च स
त्यादिलक्षणं ब्रह्म सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतेः प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरं वचसा
मात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितमिति विष्णुपुराणे ६४ तपआदीनां विवर्द्धनात् ब्रह्मविवर्द्ध
नः ६५ वेदं वेदार्थं च यथावद्वेत्तीति ब्रह्मवित् ६६ ब्राह्मणात्मना समस्तानां प्रवचनं कुर्वन्वेदस्या २९

यमिति ब्राह्मणः ६७ ब्रह्मसंज्ञितान्यस्य शेषभूतानीति ब्रह्मी ६८ वेदान्स्वात्मभूतान् जानातीति ब्रह्मज्ञः
६९ ब्राह्मणानां प्रियो ब्राह्मणप्रियः ब्राह्मणाः प्रिया अस्येति वा घ्नन्तं शपन्तं परुषं वदन्तं यो ब्राह्मणं
न प्रणमेद्यथाहं स पापकृद्ब्रह्मदवाग्निदग्धो वध्यश्च दण्ड्यश्च न चास्मदीय इति भगवद्वचनात् ।
यं देवं देवकी देवी वसुदेवादजीजनत् भौमस्य ब्रह्मणो गुप्त्यै दीप्तमग्निमिवारणिरिति महाभार
ते ७० ७४ महाक्रमो महाकर्मा महातेजा महोरगः महाक्रतुर्महायज्वा महायज्ञो महाहविः ७५
महान्तः क्रमाः पादविक्षेपा अस्येति महाक्रमः शं नो विष्णुरुरुक्रम इति श्रुतेः ७१ महज्जगदुत्प
त्त्यादिकर्मास्येति महाकर्मा ७२ यद्दीप्तेन तेजसा भास्करादयः तेजस्विनस्तस्य महत्तेज इति महा
तेजाः यदादित्यगतं तेजस्तत्तेजो विद्धि मामकमिति श्रीभगवद्वचनात् क्रौर्यशौर्यादिभिर्धर्म
हद्भिः समलंकृत इति वा महातेजाः ७३ महांश्चासावुरगश्चेति महोरगः सर्पाणामस्मि वासु
किरिति भगवद्वचनात् ७४ महांश्चासौ क्रतुश्चेति महाक्रतुः यथाश्वमेधः क्रतुराडिति म
न्वचनात् सोपि स एव ७५ महांश्चासौ यज्वा चेति लोकसंग्रहार्थं यज्ञान्निर्वर्तयन् महायज्वा ७६
महांश्चासौ यज्ञश्चेति महायज्ञः यज्ञानां जपयज्ञोस्मीति भगवद्वचनात् ७७ महद्धवनं हविश्चेति

म.टि.
४

५०

महाहविः महाक्रतुर्विस्यादिबहुश्रीह्विर्वा ७८ ८५ स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ८६ सर्वैः स्तूयतेनेन स्तोता कस्यविधिन स्तव्यः ७४
अत एव स्तवप्रियः ८ येन स्तूयते तत्स्तोत्रं गुणसंकीर्तनात्मकं तद्धरिरेव ८ स्तुतिस्तवनक्रि
या ८२ स्तोतापि स एव ८३ प्रियं रणमस्य यतः पंच महायुधानि धत्ते सततं लोकरक्षार्थमतो
रणप्रियः सकलकामैः सकलाभिश्च शक्तिभिः संपन्नः पूर्णः ८५ न केवलं पूर्ण एव पूरयि
ता च सर्वेषां संपद्भिः ८६ स्मरणेन सर्वेषां कल्मषाणि क्षपयतीति पुण्यः ८७ पुण्या कीर्तिर
स्य यतः पुण्यमावहन्त्यस्य कीर्तनं नामानीति पुण्यकीर्तिः ८८ आन्तरैर्बाह्यैर्व्याधिभिः कर्मजैः
न पीड्यत इत्यनामयः ८९ ९० मनोजवस्तीर्थकरो वसुरेता वसुप्रदः वसुप्रदो वासुदेवो वसुर्व
सुमना हविः ९ मनस इव वेगोस्य सर्वगत्वादिति मनोजवः ९० चतुर्दश विद्यानां वा
ह्यसमयानां च प्रणेता प्रवक्ता चेति तीर्थकरः हयग्रीवरूपेण मधुकैटभौ हत्वा विरिंचाय स
र्वेभ्यो वेदाः श्रुतीरन्याश्च विद्या उपादिशत् वा बाह्यविद्याः सुरवैरिणां वंचनाय चोपदिष्टा इ
ति पौराणिकाः कथयंति ९२ देवः सर्वमयः स्रष्टा नास्य कार्यमवास्सृजत् तदंडमभवद्धैमं स

स्रोऽस्य समग्रं ब्रह्मणः कारणं परमिति वचनात् वसुरेताः ९२ वसु धनं प्रकर्षेण ददातीति
वसुप्रदः ९३ वसु यत्फलं मोक्षाख्यफलं भक्तेभ्यः प्रददातीति द्वितीयो वसुप्रदः विज्ञानमा
नंदं ब्रह्म रातेर्दातुः परायणं तिष्ठमानस्य तद्विद इति श्रुतेः सुरारीणां वसु निप्रकर्षेण
खंडयन्वा वसुप्रदः ९४ वसुदेवस्यापत्यं वासुदेवः ९५ वसंति भूतानि अत्र तेष्वयं वा वसती
ति वसुः ९६ अविशेषेण सर्वेषु विषयेषु वसतीति वसु तन्मोऽस्येति वसुमनाः ९७ हविर्ब्र
ह्महविरिति भगवद्वचनात् ९८ ८० सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः शूरसेनो
यदुश्रेष्ठः सन्निवासः सुयामुनः ८८ अस्तिब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति श्रुतेः
ब्रह्मास्तीति ये विदुस्ते सन्तस्तैः प्राप्यते इति सद्गतिः सती गतिर्बुद्धिरस्येति वा सद्गतिः ९९ स
ती कृतिर्यस्येति सत्कृतिः १०० इति नाम्नां सप्तमं शतं विवृतम् श्रीवत्सवक्षाः श्रीकरः विधेया
त्मा विशोकः अमितविक्रमः कामदेवः ब्रह्मणः महाक्रमः लोके तीर्थकरः १ सजातीयवि
जातीयस्वगतभेदरहिता सत्ता एकमेवाद्वितीयं ब्रह्मेति श्रुतेः १ सैव परमात्मा विदात्मको
बाधात् भासमानत्वाच्च सद्भूतिः नान्यः प्रतीतेर्बाध्यमानत्वाच्च सत्त्वाप्यसत् श्रोतायोक्तिवाबा

वाधः प्रपंचस्य विवर्त्तिनः २ सतां तत्त्वविदां श्रेष्ठं परमयनमिति सत्परायणः ३ हतमत्सरसखाः सैनि
काः शौर्यशालिनो यस्यां सेनायां सा महती सेना यस्य सः महासेनः ४ यदूनां प्रधानतया यदुश्रेष्ठः ५
सतां विदुषामाश्रय इति सन्निवासः ६ शोभना यामुना संबंधिनः परिवेष्टारो स्य विष्णुयामुनः
गोपविष्णुधरा वा ७ ८ भूतावासो वासुदेवः सर्वासुनिलयोनलः दर्पहा दर्पदो दृप्तो दुर्धरोथा
पराजितः ८९ भूतान्यत्राभिमुख्येन वसंतीति भूतावासः वसंति त्वयि भूतानि भूतावासस्ततः
नोऽह विविधे हरि विष्णो ८ जगदाच्छादयति मायये निवासः स एव देवश्च निवासुदेवः छादयामि
जगद्विश्वं भूत्वा सूर्य इवांशुभिः इति भगवद्वचनात् ९ सर्वएवासवो मुख्याः प्राणजीवात्मके
यस्मिन्नव्यये निलीयन्ते स सर्वासुनिलयः १० अलं पर्याप्तिः शक्तिसंपदो नास्य विद्यत इत्यन
लः ११ धर्मविरुद्धे पथि तिष्ठतां दर्पं हंतीति दर्पहा १२ धर्मवर्त्मनि वर्त्तमानानां दर्पं ददातीति द
र्पदः १३ स्वात्मामृतरसास्वादनान्नित्यं प्रमुदितो दृप्तः १४ न शक्या धारणा यस्य प्रणिधाना
दिषु सर्वोपाधिविनिर्मुक्तत्वात् तथापि तत्प्रसादतः केषांचित् स्वहृदये धार्यते जन्मांतरसहस्रे
षु भावनायोगात् तस्माद्दुर्धरः क्लेशोधिकतरस्तेषामव्यक्तासक्तचेतसां ॥ ॥ ॥ ॥

अयमस्माद्दिगातिर्दुः स्वदेहवह्निरवाप्यतेति भगवद्वचनात् १५ नानादेवैर्वा दैत्यैरपि शत्रुभिः पराजित इ
त्यपराजितः १६ ८९ विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् अनेकमूर्तिरव्यक्तः शतमू
र्तिः शताननः ९० विश्वं मूर्तिरस्य सर्वात्मत्वादिति विश्वमूर्तिः १७ महती मूर्तिरस्येति महा
मूर्तिः १८ ज्ञानमयी स्वेच्छया तेजसी वा मूर्तिरस्येति दीप्तमूर्तिः १९ कर्मनिबन्धना मूर्तिरस्य
न विद्यत इत्यमूर्तिमान् २० अवतारेषु स्वेच्छया लोकानामुपकारिणीर्बह्वीर्मूर्तीर्भजत इत्य
नेकमूर्तिः २१ यद्यप्यनेकमूर्तित्वेन यथाप्ययमीदृश इति न व्यज्यत इत्यव्यक्तः २२ नानावि
कल्पजा मूर्तयः विकारकृताः सन्तीति शतमूर्तिः २३ विश्वादिमूर्तित्वेनवा पतोत एव शताननः
२४ ९० एको नैकः सवः कः किं यत्तत्पदमनुत्तमम् लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ९१
परमार्थतः सजातीयविजातीयस्वगतभेदविनिर्मुक्तत्वादेकः २५ मायया बहुरूपत्वान्नैकः इ
न्द्रो मायाभिः पुरुरूप ईयत इति श्रुते २६ सोमो यत्राभिषूयते सोऽध्वरः सवः २७ कः शब्दः सुख
वाचकस्तेन स्तूयत इति कः कं ब्रह्मेति श्रुतेः २८ सर्वपुरुषार्थरूपत्वाद्ब्रह्मैव विचार्यमिति ब्रह्म
किं २९ यच्छब्देन स्वतः सिद्धवस्तुनिर्देशवाचिना ब्रह्म निर्दिश्यत इति ब्रह्म यत्तत्पदेनोवाच्यमानिभ

सही॰
४२
52

तानिजायंत इति श्रुतेः २० तनोतीति ब्रह्म तत् ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति भ
गवद्वचनात् २१ पद्यते मुमुक्षुभिरिति पदं यस्मादुत्कृष्टं नास्तीति तदनुत्तमं सविशेषणमेकं नाम
पदमनुत्तममिति २२ सर्वाधारभूतेस्मिन्सकललोकाववध्यंत इति लोकवंधुः लोकानां जनकत्वा
द्वा लोकवंधुः वंधुकृत्यं हिताहितोपदेशं श्रुतिस्मृतिलक्षणं कृतवानिति वा लोकवंधुः २३ लो
कान्नाथते याचते उपतपति आशास्ते तेषामीष्ट इति वा लोकनाथः लोकैर्याच्यते प्रार्थ्यत इति।
वा लोकनाथः २४ मधुकुले जातत्वान्माधवः २५ भक्तानां स्नेही भक्तवत्सलः २६ ५१ सुवर्णवर्णो
हेमांगो वरांगश्चंदनांगदी वीरहा विषमः शून्यो घृताशीरचलश्चलः ५२ सुवर्णस्य वर्ण इव वर्णो
स्येति सुवर्णवर्णः यदा पश्यः पश्यते रुक्मवर्णमिति श्रुतेः २७ हेमेवांगं वपुरस्येति हेमांगः यएषो
न्तरादित्ये हिरण्मयः पुरुष इति श्रुतेः २८ वराणि शोभनान्यंगान्यस्येति वरांगः २९ चंदनैराह्लादनै
रंगदैः केयूरैर्भूषित इति चंदनांगदी ४० वीरान्हिरण्यकशिपुप्रभृतीन्हंतीति वीरहा ४१ समो नास्य
स्य विद्यते सर्वविलक्षणत्वादिति विषमः न त्वत्समोस्त्यभ्यधिकः कुतोन्य इति भगवद्गीतावचना
त् ४२ सर्वविशेषरहितत्वाच्छून्यवत् शून्यः ४३ घृता विगलिता आशिषः प्रार्थना अस्येति घृता ४२

शीः ४४ नस्वरूपान्नसामर्थ्यान्नचज्ञानादिकाद्गुणात्चलनंविद्यतेयस्येत्यचलः ४५ वायुरूपेण
चलतीतिचलः ४६ ६२ अमानीमानदोमान्योलोकस्वामीत्रिलोकधृत् सुमेधामेधजोधन्यः
सत्यमेधाधराधरः ६२ अनात्मवस्तुष्वात्माभिमानोनास्तिस्वच्छसंवेदनाकृतेरित्यमानी ४७ स्व
मायया सर्वेषामनात्मस्वात्माभिमानंददातीति भक्तानांमानंसत्कारंददातीति अधर्मिष्ठानांमा
नंसत्कारंखंडयतीति तत्त्वविदामनात्मनि आत्माभिमानंखंडयतीति वा मानदः ४८ पूजनीयःस
र्वेश्वरत्वादिति मान्यः ४९ चतुर्दशलोकानामीश्वरत्वात् लोकस्वामी ५० त्रीन्लोकान्धारयती
ति त्रिलोकधृत् ५१ शोभनास्वाभाविकीमेधाप्रज्ञास्येति सुमेधाः नित्यमसिच्प्रजामेधयोरि
ति समासान्तोऽसिच्प्रत्ययः ५२ मेधेऽध्वरेजायतइति मेधजः ५३ कृतार्थोधन्यः ५४ सत्याविद
थामेधास्येति सत्यमेधाः ५५ अशेषरशेषविशेषाघरशेषाधरांधारयन् धराधरः ५६ ६२ तेजोवृषो
द्युतिधरः सर्वशस्त्रभृतांवरः प्रग्रहोनिग्रहोव्यग्रोनैकशृंगोगदाग्रजः ६४ तेजांसिअंभांसिआ
दित्यरूपेणवर्षतीति तेजोवृषः ५७ द्युतिमंगगतांकांतिंधारयन् द्युतिधरः ५८ सर्वशस्त्रभृतांश्रे
ष्ठइति सर्वशस्त्रभृतांवरः ५९ भक्तैरुपहृतंपत्रपुष्पादिकंप्रगृह्णातीति प्रग्रहः धावतोविषयारण्ये

स.टी.
४३
43

इदंतेहियवाजिनः तत्प्रसादेन रश्मिनेवव भातीति वा ग्रहवत्सग्रहः ६० सर्वपेन सर्वं निग्रह्णातीति नि-
ग्रहः ६१ विगतमयेनाशोऽस्येति विग्रहः भक्तानामाभीष्टप्रधानेषु क्षिप्रं ग्रहणं निवा ग्रग्रः ६२ चतुःशृंगो
नैवमृंगः चत्वारि शृंगा त्रयो अस्य पादा इति मन्त्रवर्णात् ६३ निगदेन मन्त्रेणाग्रे ज्ञायत इति निशा-
ब्दलोपं कृत्वा गदाग्रजः ६४ ९६ चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः चतुरात्मा चतुर्भावश्चतु-
र्वेदविदेकपात् ९५ चतस्रो मूर्तयो विराट्सूत्राव्याकृततुरीयात्मानोऽस्येति चतुर्मूर्तिः ६५ चत्वा-
रो बाहवोऽस्येति चतुर्बाहुः इति वासुदेवे चतं ६६ शरीरपुरुषः छन्दःपुरुषो वेदपुरुषो महापुरुष इ-
ति बह्वृचोपनिषद्रूक्ताश्चत्वारो व्यूहा अस्येति चतुर्व्यूहः ६७ आश्रमाणां वर्णानां च चतुर्णां यथोक्त-
कारिणां गतिश्चतुर्गतिः ६८ रागद्वेषादिरहितत्वात् चतुरं मनोऽस्येति मनोबुद्धिरहंकारश्चित्तं चतु-
ष्टयमात्मा अस्येति वा चतुरात्मा ६९ धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयं भवत्युत्पद्यते यस्मा-
दिति चतुर्भावः ७० यथावद्वेत्ति चतुर्णां वेदानामर्थमिति चतुर्वेदवित् ७१ एकः
पादोऽस्येति एकपात् पादोऽस्य विश्वा भूतानीति श्रुतेः विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो
जगदिति स्मृतेश्च ७२ ९५ रामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामराम

४३

समावर्तोनिवृत्तात्मादुर्जयोदुरतिक्रमः दुर्लभोदुर्गमोदुर्गोदुरावासोदुरारिहा ९६ संसारचक्रस्य
सम्यगावर्त्तकइतिसमावर्त्तः ७३ सर्वत्रवर्त्तमानत्वान्ननिवृत्तःकुत्राप्यात्माअस्येत्यनिवृत्तात्मा·
निवृत्तआत्मामनोयस्यविषयेभ्यइतिवा ७४ जेतुंनशक्यतइतिदुर्जयः ७५ भयहेतुत्वादस्याज्ञां·
सूर्यादयोनातिक्रामंतीतिदुरतिक्रमः भयादस्याग्निस्तपतिभयात्तपतिसूर्यः भयादिंद्रश्चवायुश्च
मृत्युर्धावतिपंचमइतिमंत्रवर्णात् ७६ दुर्लभयाभक्त्यालभ्यतइतिदुर्लभः जन्मांतरसहस्रेषुतपो
ध्यानसमाधिभिः नराणांक्षीणपापानांकृष्णेभक्तिःप्रजायतइतिव्यासवचनात्भक्त्यालभ्यस्त्वन
न्ययेतिभगवद्वचनात् ७७ दुःखेनगम्यतेज्ञायतइतिदुर्गमः ७८ अंतरायप्रतिहतैःदुःखादवाप्य
तइतिदुर्गः ७९ दुःखेनावासस्तेचित्तेयोगिभिरितिदुरावासः ८० दुरारिणोदुर्गामिनोदानवादी
न्हंतीतिदुरारिहा ८१।९६ शुभांगोलोकसारंगःसुतंतुस्तंतुवर्द्धनः इंद्रकर्मामहाकर्माकृ
तकर्माकृतागमः ९७ शोभनैरंगैर्ध्येयत्वाच्छुभांगः ८२ लोकानांसारंगवत्गृह्णातीतिलोक
सारंगःप्रणवस्तेनप्रतिपत्तव्यइतिवाहंसवाहनादित्वात्साधुत्वंप्रजापतिलोकानभ्यपतदिति·
पतिर्लोकानभ्यपतत्श्रुतेः ८३ शोभनस्तंतुर्विस्तीर्णःप्रपंचोऽस्येतिसुतंतुः ८४ तमेवतंतुंवर्द्धयेती

सह॰
५५

55

निवानेन त्वर्द्धनः ८५ इंद्रस्य कर्मेव कर्मास्येति इंद्रकर्मा ऐश्वर्ययुक्तमेत्यर्थः ८६ महान्ति वियदादीनि
भूतानि कर्माणि कार्याण्यस्येति महाकर्मा ८७ कृतमेव न कर्तव्यं किंचित् कर्मास्य विद्यत इति कृतक
र्मा धर्मात्मके कर्मे कृतवानिति वा ८८ कृतो वेदात्मक आगमो येनेति कृतागमः अस्य महतो भूतस्ये
त्यादिश्रुतेः ८९ ९० उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः अर्को वाजसनः शृंगी जयन्तः स
र्वविज्जयी ९८ उत्कृष्टं भवं जन्म स्वेच्छया भजत इत्युद्भवः उद्गतमपगतं जन्मास्य सर्वकारणत्वा
दिति वोद्भवः ९० विश्वातिशायि सौभाग्यशालित्वात्सुन्दरः ९१ सुष्ठु उनत्तीति सुन्दः आर्द्रीभा
वस्य वाचकः पृषोदरादित्वात्साधुत्वं ९२ रत्नवच्छोभनशोभालक्षणेन रत्नवत्सुंदरा नाभिर्यस्येति
रत्ननाभः ९३ शोभने लोचने नयने ज्ञाने वास्येति सुलोचनः ९४ ब्रह्मादिभिः पूज्यतमैरर्च्यनी
यत्वादर्कः ९५ वाजमन्नमर्थिभ्यो सनोतीति ददातीति वाजसनः ९६ प्रलयांभसि शृंगवान्म
त्स्यविशेषरूपी शृंगी मत्वर्थीयो निशायिने ९७ जयति अरीनतिशयेन जयहेतुर्वा जयंतः ९८
न॰ सर्वविषयं ज्ञानमस्येति सर्ववित् आभ्यंतरान्रागादीन्बाह्यांश्च हिरण्याक्षादींश्च जेतुं शीलम
स्येति जयी सर्वविच्चासौ जयी चेत्येकं नाम ९९ ९८ सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः महा

५५

हृदो महागर्तो महाभूतो महानिधिः ९५ विंदवोवयवाः सुवर्णसदृशा अस्येति सुवर्णविंदुः आ
प्रणखात् सर्व एव सुवर्ण इति श्रुतेः शोभनो वर्णोक्षरं विंदुश्चयस्मिन्मंत्रे स मंत्रात्मा वा सुवर्ण
विंदुः ८०७ इति नाम्नोऽष्टमं शतं विवृतं सन्ना अनलः अनेकमूर्तिः तत्र वीरहा त्रिलोकधृगिति
ग्रहश्चतुर्वेदवित् इत्यादिनामसु दरः १ गुणगृह्याटिभिः शब्दादिविषयैः त्रिदशादिभिस्त्वनंतो
न दृश्यतो भयः १ सर्वेषां वागीश्वराणां ब्रह्मादीनामपि ईश्वरः सर्ववागीश्वरेश्वरः २ अवगाढः
सदानंदविश्रमसुखमास्ते इति महाहृदः ३ गर्तवदस्य माया दुरत्ययेति महागर्तः मम माया
दुरत्ययेति भगवद्वचनात् अथवा गर्तशब्दो रथपर्याय इति नैरुक्तैरुक्तः तस्मात् महागर्तः म
हारथो महारथत्वप्रसिद्धभारतादिषु ४ कालत्रयानवच्छिन्नस्वभावत्वात् महाभूतः ५ स
र्वभूतान्यस्मिन्निधीयंत इति महानिधिः ६ ९५ कुमुदः कुंदरः कुंदः पर्जन्यः पावनोऽनिलः अमृता
शोऽमृतवपुः सर्वज्ञः सर्वतोमुखः १०० कुं धरणीं भारावतारणं कुर्वन्मोदयतीति कुमुदः सुदिरवोत
भावितानिजयथैः २ कुंदपुष्पतुल्यानि फलानि सारानि ददातीति कुंदरः कुंदपुष्पतुल्यानि फलानि
लानि ददातीति कुंदरः कुं धरां दारयामास हिरण्याक्षजिघांसया वाराहरूपमास्थायेति वा कुंदरः ८

स॰टी॰
४५

कुंदोपमांगत्वात्कुंदः कुं पृथिवीं कश्यपाय ददातीति वा कुंदः सर्वपापविशुद्ध्यर्थं वाजिमेधेन चेष्टवा
न् तस्मिन्यज्ञे महादाने दक्षिणां भृगुनंदनः मारीचाय ददौ प्रीतः कश्यपाय वसुंधरामिति हरि
वंशे कुं पृथिवीं खंडयतीति वा कुंदः शरेन पृथिवी न्यस्तलक्ष्यं तेन निःक्षत्रियां यश्चकार मेदिनी
मनेकशो बाहुवनं तथा छिन्नं यः कार्तवीर्यस्य स भार्गवोत्तमो मम मास्तु मोगल्या विहृहृदये हरि
रिति श्रीविष्णुधर्मे ९ पर्जन्यवदाध्यात्मिकादितापत्रयं शमयतीति सर्वान्कामानभिवर्षतीति
वा पर्जन्यः १० स्मृतिमात्रेण पुनातीति पावनः ११ इलति प्रेरणं करोतीति इलः इलद्दूलतन्वादनि
लः इलति स्वपितीति इलः न इलः अनिलः हि परीतो नित्यप्रबुद्धस्वरूपत्वादनिलो वा अथवा निलेर्ग
हनार्थात्कमप्यर्थात्तान्नग्राहनः १२ स्वरूपानंदानुभवादमृतांशः मथितममृतं सुरान्पा प
यित्वा स्वयं चापिबदिति वामृतांशः अमृता अविनश्वरा अविनश्वरफलत्वादाशा वांछास्ये
ति वा १३ मृतं मरणं तद्रहितं वपुरस्येत्यमृतवपुः १४ सर्वं जानातीति सर्वज्ञः समस्तं वेत्तीति
श्रुतेः १५ सर्वतोऽक्षिशिरोमुखमिति भगवद्वचनात्सर्वतोमुखः १६ १०० सुलभः सुव्रतः सि
द्धः शत्रुजिच्छत्रुतापनः न्यग्रोधोदुंबरोऽश्वत्थश्चाणूरांध्रनिषूदनः १०१ पत्रपुष्पादिभिर्भ

४५
45

क्रिमात्रमर्पितैः सुखेन लभ्यत इति सुलभः पत्रेषु पुष्पेषु फलेषु तोयेष्वक्रीतलभ्येषु सदैव सत्स्व
भक्त्यैकलभ्ये पुरुषे पुराणे मुक्त्यै किमर्थं क्रियते प्रयत्न इति महाभारते १७ शोभनं व्रतयति भुङ्क्ते
भोजनान्निवर्तत इति वा सुव्रतः १८ अनन्याधीनसिद्धत्वात्सिद्धः १९ सुरशत्रव एवास्य शत्रवस्ता
न्जयतीति शत्रुजित् २० तापनात्सुरशत्रूणां शत्रुतापनः २१ न्यक् अर्वाक् रोहतीति सर्वेषामुपरि
वर्तमान इति न्यग्रोधः सर्वाणि भूतानि न्यक्कृत्य निजमायया आवृणोति रुणद्धीति वा न्यग्रोधः
२२ अम्बरादूर्ध्वः कारणत्वेनेत्युदुम्बरः यद्वा ऊर्गन्नं तेनात्मना विश्वं पोषयन्नुदुम्बरः ऊर्ग्वा अन्न
मुदुम्बर इति श्रुतेः २३ श्वोऽपि न स्थास्यतीत्यश्वत्थः ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः स
नातन इति श्रुतेः ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययमिति स्मृतेश्च चाणूरनामानमन्ध्रं
निषूदितवानिति चाणूरान्ध्रनिषूदनः २५ सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः अमूर्तिर
नघोऽचिन्त्यो भयकृद्भयनाशनः ॥ १२ ॥ सहस्राण्यनन्तान्यर्चींषि यस्य स सहस्रार्चिः दिवि सूर्यस
हस्रस्य स्यादिति भगवद्वचनात् २६ सप्त जिह्वा अस्य सन्तीति सप्तजिह्वः अग्निरूपी काली कराली च
मनोजवा च सुधूम्रवर्णा च सुलोहिता च स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त

मही·
५६
56

जिह्वाः इति मुंडके २७ सप्त एधांसि दीप्तयोऽस्येति सप्तैधाः अग्निः सप्त ते अग्ने समिधः सप्त जिह्वा इति मंत्र
वर्णात् २८ सप्त अश्वाः सप्तनामैको वाऽश्वो वाहना अस्य आदित्यः एको अश्वो वहति सप्तनामेति श्रुतेः २९
मूर्तिश्चेनरूपधारणसमर्थं चराचरलक्षणं तन्नाभ्या मितमाभ्योन्मूर्तिरजायत इति श्रुतेः तद्रहित इत्यमू
र्तिः अथवा देहसंस्थानलक्षणा मूर्छितांगावयववा मूर्तिः तद्रहित इत्यमूर्तिः ३० अनघः दुःखं
पापं च अघमस्य न विद्यते सोऽनघः ३१ प्रमाणादिसाक्षित्वेन सर्वप्रमाणागोचरत्वादचिन्त्यः अय
मीदृश इति विश्वप्रपंचविलक्षणत्वेन चिंतयितुमशक्यत्वाद्वाऽचिन्त्यः ३२ भयमार्गवर्तिनां भयंक
रोतीति भयकृत् ३३ वर्णाश्रमाचारवता पुरुषेण परः पुमान् विष्णुराराध्यते पंथा नान्यस्तत्
तोषकारकः इति विष्णुपुराणात्ते राधितत्वात्तेषां भयं नाशयतीति भयनाशनः ३४ ।१०२ अ
णुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्द्धनः ।१०३
सौक्ष्म्यातिशयशालित्वादणुः एषोऽणुरात्मा चेतसा वेदितव्य इति श्रुतेः ३५ बृहत्त्वाद्बृंहणत्वा
च्च ब्रह्म बृहत् ३६ अस्थूलमित्यादिना द्रव्यत्वप्रतिषेधात्कृशः ३७ स्थूल इति उपचर्यते सर्वात्म
कत्वात् ३८ सृष्टिस्थितिलयकर्मसु अधिष्ठातृत्वात् गुणभृत् ३९ सत्त्वतो गुणाभावान्निर्गुणः साक्षी चेता के
५६

वलो निर्गणश्चेति श्रुतेः ४० शब्दादिगुणरहितत्वात् अतिशयसूक्ष्मत्वात् नित्यशुद्धसर्वगतत्वादिश्रु
तिवेधकधर्मजातं तर्कतोपि वक्तुमशक्यमत एव महान् अशब्दोऽस्पर्शो ऽमहच्चेचिरित्यापस्त
वः ४१ पृथिव्यादीनां धारकानामपि धारकत्वात् केन चित् ध्रियते इत्यधृतः ४२ यद्येवमथ केन धार
यते इत्याशंक्याह स्वेनात्मनैव धारयते इति स्वधृतः स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नीति
श्रुतेः ४३ पद्मोदरदलताम्रमभिरूपतममास्यमस्येति स्वास्यः वेदात्मको महान् शब्दराशिः मु
खान्निर्गतः पुरुषार्थोपदेशार्थमस्येति वा स्वास्यः अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद इत्या
दिश्रुतेः ४४ अन्यस्य वंशः पाश्चात्यः अस्य वंशः प्रपंचः प्रागेव न यस्मात् इति प्राग्वंशः ४५ वंशं
प्रपंचं वर्द्धयन् छेदयन्वा वंशवर्द्धनः ४६ । ८ भारभृत्कथितो योगी योगीशः सर्वकामदः आ
श्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः । ८ अनंतरूपेण भुवो भारं विभर्तीति भारभृत् ४७
वेदादिभिः परत्वेन कथितः सर्वैर्वेदैः कथित इति वा कथितः सर्वे वेदा यत्पदमामनन्तीति वेदैश्च
सर्वैरहमेव वेद्य इति वेदे रामायणे चैव पुराणे भारते तथा आदावंते च मध्ये च विष्णुः सर्वत्र गी
यते इत्यादिवचनात् सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमित्युक्तेः किं तदध्वनो विलो

स॰टी॰
४०

र्थां पनशीलस्य परमं पदं सततत्वमित्याकांक्षायामिन्द्रियादिभ्यः सर्वेभ्यः परत्वेन प्रतिपाद्यते इन्द्रियेभ्यः
परा ह्यर्था इत्यारभ्य पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरित्यंतेन नयः कथितः सः ४८ योगो
ज्ञानं तेनैव गम्यत्वाद्योगी योगः समाधिः स हि स्वात्मनि सर्वदा समाधत्ते स्वात्मानं तेन वा योगी
४९ अन्ये योगिनोऽन्तरायैर्हन्यन्ते अयं तु न तैर्विहितत्वात्तेषामीशः ५० सर्वान्कामान्ददातीति सर्व
कामदः फलमत उपपत्तेरिति भगवता श्रीवेदव्यासेनाभिहितत्वात् ५१ आश्रमवत्सर्वेषां संस
रारण्ये भ्रमतां विश्रामस्थानत्वादाश्रमः ५२ अविवेकिनः सतापयतीति श्रमणः ५३ क्षामाः
क्षीणाः प्रजाः सर्वाः करोतीति क्षामः ५४ शोभनानि पर्णानि छन्दांसि संसारतरुरूपिणोऽस्ये
ति सुपर्णः छन्दांसि यस्य पर्णानीति भगवद्वचनात् ५५ वायुर्वहति यद्भीत्या भूतानि स वायुवाह
नः भीषास्माद्वातः पवत इति श्रुतेः ५६ ७४ धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः अपराजितः सर्व
सर्वसहो नियन्ता नियमो यमः ७५ रामनामधनुः श्रीमद्धारयामासेति धनुर्धरः ५७ स एव दा
शरथिर्धनुर्वेदं वेत्तीति धनुर्वेदः ५८ दमनं दमयतां दण्डः दण्डो दमयतामस्मीति भगवद्वचनात्
५९ वैवस्वतनरेन्द्रादिरूपेण प्रजा दमयतीति दमयिता ६० दमो दण्डकार्यं फलं तच्च स एवेति दमः ४०

९१ शत्रुभिर्न पराजित इत्यपराजितः ९२ सर्वकर्मसु समर्थ इति सर्वसहः सर्वान् शत्रून् संहरतीति
वा ९३ सर्वान् स्वेषु स्वेषु कृत्येषु स्थापयतीति नियन्ता ९४ नियमो नियतिस्तस्य न विद्यत इत्यनि
यमः सर्वनियन्तृत्वे नियंतृत्वाभावात् ९५ नास्य विद्यते यमो मृत्युरित्ययमः अथवा यमनियमौ
योगांगौ तद्रूपत्वात् स एव नियमो यमः ९६ १५ सत्ववान् सात्विकः सत्यः सत्यधर्मपरायणः अ
भिप्रायः प्रियार्होऽर्हः प्रियकृत् प्रीतिवर्द्धनः १६ शौर्यवीर्यादिकं सत्वमस्यास्तीति सत्ववान् ९७
सत्वे गुणे प्राधान्येन स्थित इति सात्विकः ९८ सत्सु साधुत्वात् सत्यः ९९ सत्ये यथाभूतार्थकथने
धर्मे च चोदनालक्षणे नियत इति सत्यधर्मपरायणः ७०० अभिप्रेयते पुरुषार्थकांक्षिभिरभि
मुखेन प्रलये यस्मिन्नेति जगदिति वा अभिप्रायः ०१ प्रियाणीष्टान्यर्हतीति प्रियार्हः यद्यदि
ष्टतमं लोके यच्चास्य दयितं गृहे तत्तद्गुणवते देयं तदेवाक्षयमिच्छतेति स्मरणात् ०२ एवाप्र
शंसास्तुतिनमस्कारादिभिः पूजनीय इत्यर्हः ०३ न केवलं प्रियार्ह एव अपि तु स्तुत्यादिभि
र्भजतां प्रियं करोतीति प्रियकृत् ०४ तेषामेव प्रीतिं वर्द्धयतीति प्रीतिवर्द्धनः ०५ १६ विहाय
सगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः रविर्विरोचनः सूर्यः सविता रविलोचनः १७ विहायस

सू.टी. ५८ गतिरस्येति विहायसगतिः विष्णुपदमादित्यो वा ७६ स्वेन एव तनयोतत इति ज्योतिः ७७ शोभना

रुचिर्दीप्तिरिच्छा वास्येति सुरुचिः ७८ समस्तदेवतोद्देशेन प्रहुतेष्वपि कर्मसु हुतं भुङ्क्ते भुनक्ति वा

इति हुतभुक् ७९ सर्वत्र वर्तमानत्वात् त्रयाणां लोकानां प्रभुत्वाद्वा विभुः ८० रसानादत्त इति रवि

गारिस्यात्मा ८१ विविधं रोचत इति विरोचनः ८२ सूतेः सवतेर्वा सूर्यः श्राद्धानित्यामायते ८३ सू

र्वस्य जगतः प्रसविता सविता ८४ रविर्लोचनं चक्षुरस्येति रविलोचनः अग्निर्महीं चक्षुषी चे

द्रसूर्याविति मेच्चवर्णात ८५ ९० अनन्तो हुतभुग्भोक्ता सुखदो नैकजोऽग्रजः अनिर्विण्णः स

दामर्षी लोकाधिष्ठानमद्भुतः ९८ नित्यत्वात्सर्वगत्वात् देशकालपरिच्छेदाभावादनन्तः ८६ हुते

भुनक्तीति हुतभुक् ८७ प्रकृतिं भोग्यामचेतनां भुङ्क्त इति जगत्पालयतीति वा भोक्ता ८८ सुखं

मोक्षलक्षणं ददातीति सुखदः सुखं खण्डयतीति वा सुखदः ८९ धर्मगुप्तये सकृज्जायमान

त्वादनेकजः ९० अग्रे जायत इत्यग्रजः ९१ अवाप्तसर्वकामत्वादप्राप्तिहेत्वभावान्निर्वेदोऽस्य

न विद्यत इति निर्विण्णः ९२ सतः आभिमुख्येन मृष्यते क्षमत इति सदामर्षी ९३ तमधिष्ठाय

लोकास्तिष्ठन्तीति लोकाधिष्ठानं ब्रह्म ९४ अद्भुतः श्रवणपापिबहुभिर्यो न लभ्यः स्याद

तोपि वह्वो यं न विदुः आश्चर्यो वक्ता कुशलोस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्ट इति श्रुतेः
आश्चर्यवत्पश्यति कश्चिदेनमिति भगवद्वचनात् स्वरूपशक्तिव्यापारकार्यैरद्भुतत्वादद्भुतः ९५
१८ सनात्सनातनतमः कपिलः कपिरप्ययः स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिद ।
क्षिणः १५ सनादिति निपातश्चिरार्थवचनः कालश्चापरस्यैव विकल्पना परस्य ब्रह्मणो
रूपं पुरुषः प्रथमे ह्नि जन्यमर्त्यविक्रेतन थैवान्येद्रूपकालस्तथा परमिति पुराणे ९६ सर्वकारण
त्वाद्धिरिञ्च्यादीनामपि सनातनानां सनातनतमः ९७ वडवानलस्य कपिलो वर्ण इति तद्रूपी
कपिलः ९८ कं जलं रश्मिभिः पिवन्कपिः वराहो वा कपिः कपिर्वराहश्रेष्ठ इति वचनात् ९९
प्रलये स्मिन्नपि यन्ति जगन्तीत्यप्ययः ९०० इति नाम्नां नवमशतं विवृतम् अतो भ्यः पावनः
शत्रुतापनः अनघः महान् सर्वकामदः दमः अभिप्रायः रविरग्रजः १ भक्तानां स्वस्तिमंगल
ददातीति स्वस्तिदः १ तदेव करोतीति स्वस्तिकृत् २ मंगलस्वरूपमात्मीयं परमानंदलक्षणं स्व
स्तिभकु भक्तानां स्वस्तिमंगलं भुनक्ति इति वा स्वस्तिभुक् ४ स्वस्तिरूपेण दक्षिणो वर्द्धते स्व
स्तिदाने समर्थ इति वा स्वस्तिदक्षिणशब्द आशुकारिणि वा वर्त्तते यत्स्मरणादेव सिध्यन्ते स

स.टी.
५६
५१

सर्वसिद्धयः स्मरणादेवकस्य यस्यापमेत्यात पंजरं शतधा भेदमाशतधा भेदमायाति गिरिर्वज्रहतो
यथेति वचनात् ॥५१॥ अगौद्रः कुंडली चक्री विक्रम्यूर्जितशासनः शब्दातिगः शब्दसहः शिशि
रः शार्वरीकरः ॥११॥ कर्मेरौद्रागम्यरौद्रः कोपस्य रौद्रः यस्य नास्ति अवाम सर्वकामत्वेन रागाद्रे
षादेरभावादित्यरौद्रः ६ शेषद्वयभाकुंकुंडली सहस्रांशुमंडलोपमकुंडलधारणाद्वा कुंडली ७
समस्तलोकरक्षार्थं मनस्तत्त्वात्मकं सुदर्शनाख्यं चक्रं धत्ते इति चक्री ८ विक्रमः पादविक्षेपः शौ
र्यं वा द्वयमशेषपुरुषेभ्यो विलक्षणमस्यास्तीति विक्रमी ९ ऊर्जितमत्यतिलक्षणमूर्जितं शासन
मस्येति ऊर्जितशासनः १० शब्दसहातिहेतूनां जात्यादीनामभावात् शब्देन वक्तुमशक्यत्वात् श
ब्दातिगः यतो वाचो निवर्तन्ते अशब्दगोचरः यस्य योगिध्येयं परं पदमित्यादिश्रुतिस्मृतिभ्यः
तमेव सर्वे वेदास्तात्पर्येणावदंतीति शब्दसहः सर्वे वेदा यत्पदमामनंतीति श्रुतेः वेदैश्च सर्वैर
हमेव वेद्य इति स्मृतेश्च १२ तापत्रयाभितप्तानां विश्रामस्थानत्वात् शिशिरः १३ संसारिणामा
त्मा शार्वरीव शार्वरी ज्ञानिनां पुनः संसारः शार्वरी तामभयेषां करोतीति शार्वरीकरः यानिशा स
र्वभूतानां तस्यां जागर्ति संयमी यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेरिति भगवद्वचनात्

१४॥ अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥१११॥
अवाप्तसर्वकामत्वात्क्रौर्यमस्य न विद्यत इत्यक्रूरः १५ कर्मणा मनसा वाचा वपुषा च शोभनत्वा
त्पेशलः १६ प्रवृद्धः शक्तः शीघ्रकारी दक्षः त्रयं चैतत्त्रयमस्मिन्नियत इति दक्षः १७ दक्षिणशब्दस्या
पि दक्ष एवार्थः शब्दभेदान्न पौनरुक्त्यं अथवा दक्षते गच्छति हिनस्तीति वा दक्षिणः १८ क्षमावतां
योगिनां पृथिव्यादीनां च भारधारकाणां श्रेष्ठ इति क्षमिणां वरः क्षमया पृथिवी सम इति वा
ल्मीकिवचनात् ब्रह्माण्डमखिलं वहन् पृथिवी च भारेण नार्दित इति पृथिव्या अपि वरः क्षमि
णः शक्ताः अयं तु सर्वशक्तिमत्वात् सकलाः क्रियाः कर्तुं क्षम इति वा क्षमिणां वरः १९ नि
रस्तातिशयं ज्ञानं सर्वदा सर्वगोचरमस्यास्ति नेतरेषामिति विद्वत्तमो हरिः २० विगतं भयं
सांसारिकं संसारलक्षणं वास्येति वीतभयः सर्वेश्वरत्वान्नित्यमुक्तत्वाच्च २१ पुण्यं पुण्यकरं श्रवणं
कीर्तनं चास्येति पुण्यश्रवणकीर्तनः य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् नाशुभं प्रा
प्नुयात्किंचित्सोऽमुत्रेह च मानव इति श्रवणादिफलवचनात् ॥२२॥ उत्तारणो दुष्कृतिहा
पुण्यो दुःस्वप्ननाशनः वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः ॥११२॥ संसारसागरादुत्तार

स.टी. ५० 50

यतीन्द्रुतारणः २३ दुष्कृतीः पापसेजिनाः हंतीति दुष्कृतिहा २४ स्मरणादिकुर्वतां पुण्यं करोती
ति सर्वेषां अतिस्फूर्तिलक्षणया वाचा पुण्यमेवाचष्ट इति वा पुण्यः २५ भाविनोनर्थस्य स्तवः
कानर्थः स्वमाशयतीति दुःस्वप्ननाशनः २६ संसारिणां गतीर्मोक्षप्रदानेन हंतीति वीरहा
२७ सत्वगणमधिष्ठाय जगत्त्रयरक्षतीति रक्षणः २८ सन्मार्गवर्जितः सेतलक्ष्येण विधाविनः
यहृदये स एव वर्तनरहति २९ सर्वाः प्रजाः प्राणरूपेण जीवयन् जीवनः ३० परितः विस्पष्ट्या
प्यावस्थितः इति पर्यवस्थितः ३१ ११२ अनंतरूपोनंतश्रीर्जितमन्युर्भयापहः चतुरस्रो ग
भीरात्मा विदिशो व्यादिशो दिशः ११३ अनंतानि रूपाण्यस्य उत्पन्नेनंतरूपः ३२ अपरिमिता
श्रीः पराशक्तिरस्येत्यनंतश्रीः परास्य शक्तिर्विविधैव श्रूयत इति श्रुतेः ३३ मन्युः क्रोधो ये
न जितः स जितमन्युः ३४ भयं संसारजं पुंसामपनयन् भयापहः ३५ न्याय्यसमवेतः चतुरस्रः
पुंसां कर्मानुरूपं फलं प्रयच्छतीति ३६ आत्मा स्वरूपं चित्तं वा गंभीरं परिच्छेत्तुमशक्यमस्येति ग
भीरात्मा ३७ विविधानि फलानि पिकारिभ्यः विशेषेण दिशतीति विदिशः ३८ विविधामाज्ञां श
क्रादीनां कुर्वन् व्यादिशः ३९ समस्तानां कर्मणां फलं दिशत्वेदात्मने निदिशः ४० ११३ अ ५०

नादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः जननो जनजन्मादिर्भीमो भीमपराक्रमः ११४ आदिः का
रणमस्य न विद्यत इत्यनादिः सर्वकारणत्वात् ४१ भूराधारः सर्वाश्रयत्वेन प्रसिद्धा या भूस्ता
भुवोपि भूरिति भूर्भुवः ४२ न केवलमसौ भूर्भुवो लक्ष्मीः शोभा चेति भुवो लक्ष्मीः अथवा भू
र्लोकः भुवो भुवर्लोकः लक्ष्मीरात्मविद्या आत्मविद्या च देवि त्वमिति श्रीस्तुतेः भूम्यंतरिक्षयोः
शोभेति वा भूर्भुवो लक्ष्मीः ४३ शोभना विविधा रुचिरा गतयोस्येति सुवीरः शोभनं विविधमी
जेरिति वा ४४ रुचिरैः कल्याणैरंगदैः शोभत इति रुचिरांगदः ४५ जंतून् जनयन् जननः ल्युड्विधौ ब
हुलग्रहणात्कर्तरि ल्युट् प्रत्ययः प्रयोगवचनादिवत् ४६ जनस्य जनिमतो जन्मनः उद्भवस्या
दिर्मूलकारणमिति जनजन्मादिः ४७ भयहेतुत्वाद्भीमः भीमादयोपादाने इति निपातनात् म
हद्भयं वज्रमुद्यतमिति श्रुतेः ४८ असुरादीनां भयहेतुः पराक्रमोस्यावतारेष्विति भीमपराक्र
मः ४९ ११४ आधारनिलयो धाता पुष्पहासः प्रजागरः ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः
पणः ११५ पृथिव्यादीनां पंचभूतानामाधाराणामप्याधारत्वादाधारनिलयः ५० स्वात्मना धृ
तस्यास्यान्यो धाता नास्तीत्यधाता नञ्तत्पुरुषे इति समासान्तो विधिरनित्य कप्रत्ययाभावः संहार

स॰टी॰ सममयेसर्वाः प्रजाधयतिपिबतिहन्तिवाधाता ५१ स्वकुलात्मनास्थितानांपुष्पाणांहासवत्यपंचरूपे
५१ णप्रकाशोस्येतिपुष्पहासः ५२ नित्यप्रवृद्धत्वात्सकर्षेणजागर्तीतिप्रजागरः ५३ सर्वेषामुपरिस्थि
51 तत्वाद्ऊर्द्ध्वगः ५४ सतांकर्माणिसत्यधर्मज्ञानाचरन्नेषसुतिसत्पथाचारः ५५ मृतानपरीक्षित्प्रभृतीन्
जीवयन्प्राणदः ५६ प्रणवोनामपरमात्मनोवाचकः ॐकारस्तदभेदोपचारेणायंप्रणवः ५७ प
णानिर्व्यवहारार्थः तत्कुर्वन्पणः सर्वाणिरूपाणिविचिंत्यधीरोनामानिकृत्वाभिवदन्यदास्ते
तिस्मृतेः पुण्यानिकर्माणिसंगृह्याधिकारिभ्यस्तत्फलंप्रयच्छन्लेहणयावापणः ५८ ११५
प्रमाणंप्राणनिलयः प्राणभृत्प्राणजीवनः तत्वंतत्वविदेकात्माजन्ममृत्युजरातिगः ११६ प्र
मितिः प्रमाणंप्रज्ञानंब्रह्मेतिश्रुतेः ज्ञानस्वरूपमसंततनिर्मलंपरमार्थतः तदेवार्थस्वरूपेण
भातिदर्पणतः स्थितमितिविष्णुपुराणे ५९ प्राणारिंद्रियाणियत्रजीवेनिलीयंतेतत्परतंत्रत्वा
त्तदेहस्यधारकाः प्राणापानादयोवातस्मिंविलीयंते प्राणितीतिप्राणोजीवः परेपुंसिनि
लीयतइतिवाप्राणान्जीवोस्मिन्संहरतीतिवाप्राणनिलयः ६० पोषयन्नन्नरूपेणप्राणान्
प्राणभृत् ६१ प्राणिनोजीवयन्प्राणाख्यैःपवनैःप्राणजीवनः नप्राणेननापानेनमर्त्योजी ५१

वर्तिकस्यचनहृतेरेणान्नजीवेनयस्मिन्नेनावृणास्थितावितिमंत्रवर्णात् ६२ तत्त्वमस्तेसत्यंपरमार्थं
सतत्त्वमितिएतेएकार्थवाचिनः ६३ तत्त्वस्वरूपंयथावद्वेत्तीति तत्त्ववित् ६४ एकस्मात्सा
वात्माचेत्येकात्मात्मावाइदमेकमग्रआसीदितिश्रुतेः यच्चाप्नोतियदादत्ते यच्चात्तिविष
यानिह यच्चास्यसंततोभावस्तस्मादात्मेतिकीर्त्यतइतिस्मृतेश्च ६५ जायतेस्तिवर्द्धतेविपरि
णमतेऽपक्षीयतेनश्यतीतिषड्भावविकारास्तान्नतीत्यगच्छतीतिजन्ममृत्युजरातिगः
नजायतेम्रियतेवाकदाचिदितिमंत्रवर्णात् ६६ ११६ भूर्भुवःस्वस्तरुस्तारःसविताप्रपिताम
हः यज्ञोयज्ञपतिर्यज्वायज्ञाङ्गोयज्ञवाहनः ११७ भूर्भुवःस्वःसमाख्यानित्रीणिव्याहृत
रूपाणित्र्यक्षराणित्रयीमाराणिवहुचाग्न्याहुतेर्होमादिनाजगत्तारतिप्लवतेवेतिभूर्भुवः
स्वस्तरुः अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततः
प्रजाइतिमनुवचनात् अथवाभूर्भुवःस्वःसमाख्यलोकत्रयंसंसारवृक्षस्तोभूर्भुवःस्वस्त
रुः लोकत्रयं वृक्षवद्व्याप्यतिष्ठतीतिवाभूर्भुवःस्वस्तरुः ६७ संसारसागरात्तारयंस्तारः
६८ सर्वस्यलोकस्यजनकत्वात्सविता ६९ पितामहस्यापिपितेतिप्रपितामहः ७० यज्ञा

ऽनायज्ञः ७१ यज्ञानां याता स्वामी वा यज्ञपतिः अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेति भगवद्वचनात् ७२
यजमानात्मना तिष्ठन् यज्वा ७३ यज्ञा अङ्गान्यस्येति यज्ञाङ्गो वराहमूर्तिः वेदपादो यूपदंष्ट्रः क्रतुहस्तः
चितीमुखः अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः अहोरात्रेक्षणो दिव्यो वेदाङ्गश्रुतिभूषणः
आज्यनासः स्रुवतुण्डः सामघोषस्वनो महान् धर्मसत्यमयः श्रीमान् क्रमसत्क्रियः प्रायश्चित्तनखो
घोरः पशुजानुर्महाभुजः उद्गात्रान्त्रो होमलिङ्गः फलबीजमहौषधिः वाय्वन्तरात्मा मन्त्रस्फिग्
टि विकृतः सोमशोणितः वेदिस्कन्धो हविर्गन्धो हव्यकव्यातिवेगवान् प्राग्वंशकायो द्युतिमान् नाना
दीक्षाभिरर्चितः दक्षिणाहृदयो योगी महासत्रमयो महान् उपाकर्मोष्ठरुचकः प्रवर्ग्यावर्तभूष
णः नानाछन्दोगतिपथो गुह्योपनिषदासनः छायापत्नीसहायो वै मेरुशृङ्गमिवोच्छ्रितः इ
ति हरिवंशे ७४ फलहेतुभूतान् यज्ञान् वाहयतीति यज्ञवाहनः ७५ ॥२ यज्ञभृद्यज्ञकृद्यज्ञी
यज्ञभुग्यज्ञसाधनः यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च ॥८ यज्ञं बिभर्ति पालयतीति यज्ञभृत्
७६ जगदादौ तदन्ते च यज्ञं करोतीति कृन्ततीति वा यज्ञकृत् ७७ यज्ञानां तत्समाराधनात्मनो शेषीति यज्ञी
७८ यज्ञं भुनक्तीति यज्ञभुक् ७९ यज्ञाः साधनं यस्यासाविति यज्ञसाधनः ८० यज्ञस्यान्ते फलप्रा ५२

ष्टिं कुर्वन् यज्ञान्तकृत् वैकल्यवक्रकृशं संनेनेन पूर्णाहुत्या वा यज्ञसमाप्तिं करोतीति यज्ञान्तकृत् ८१
यज्ञानां गुह्यं ज्ञानयज्ञः फलाभिसन्धिरहितो वा यज्ञस्तदभेदोपचाराद्ब्रह्म यज्ञगुह्यम् ८२ अ
द्यते अत्ति वा भूतानीति अन्नम् ८३ अन्नमत्तीति अन्नादः सर्वं जगदन्नान्नादरूपेणाग्नीषोमा
त्मकमेवेति दर्शयितुमेवकारः चशब्दः सर्वनाम्नामेकस्मिन् परस्मिन्नुपसमुच्चित्य प्रवृत्ति
दर्शयितुं ८४ ॥११८ आत्मयोनिः स्वयंजातो वैखानः सामगायनः देवकीनन्दनः स्रष्टा क्षि
तीशः पापनाशनः ॥११९ आत्मैव योनिरुपादानकारणं नान्यदित्यात्मयोनिः ८५ निमित्त
कारणमपि स एवेति दर्शयितुं स्वयंजात इति प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादित्यवस्था
पितमुभयकारणत्वं हरेः ८६ विशेषेण खननात् वैखानः धरणीं विशेषेण खात्वा
पातालतलवासिनं हिरण्याक्षं वाराहरूपमास्थाय जघानेति पुराणे प्रसिद्धः ८७ सामानि
गायतीति सामगायनः ८८ देवक्यां सुतो देवकीनन्दनः ८९ सर्वस्य लोकस्य स्रष्टा ९०
दशरथात्मजः क्षितीशः ९१ कीर्तितः पूजितो ध्यातः संस्मृतः पापराशिविनाशयन्
पनाशनः पक्षोपवासाद्यत्पापं नरस्य पते संचितेन रणेनावत्यापेन रणे लोके हरेर्ध्याना

स.टी.
५३
53

न्यणारयतीति सुहृद्धानानपवचनात् ९९१॥ शंखभृन्नंदकी चक्री शार्ङ्गधन्वा गदाधरः रथांग
पाणिरक्षोभ्यः सर्वप्रहरणायुधः सर्वप्रहरणायुध ॐ नमः इति १२० भूताद्यहंकारात्मकं पांचज
न्याख्यं शंखं बिभ्रत् शंखभृत् ९९३ विद्यामयो नंदकाख्योऽसिरस्येति नंदकी ९९४ मनस्तत्वात्म
कं चक्रमस्यास्तीति चक्री ९९५ इंद्रियाद्यहंकारात्मकं शार्ङ्गं नाम धनुरस्येति शार्ङ्गधन्वा ९९६ बु
द्धितत्वात्मकां गदां वहन् गदाधरः ९९७ रथांगं चक्रं पाणाववस्थितमिति रथांगपाणिः ९९८ अक्षो
नएवाशाकाक्षोभितुमित्यक्षोभ्यः ९९९ एतावंत्यायुधान्यस्येत्येवं न नियमस्तेषु अपि तु सर्वाणि
व प्रहरणान्यायुधान्यस्येति सर्वप्रहरणायुधः आयुधत्वेनाप्रसिद्धान्यपि करजादीन्यायुधा
नि भवंतीति ते सर्वप्रहरणायुध इति वचनं सत्यसंकल्पत्वेन सर्वेश्वरत्वं दर्शयितुं एष सर्वेश्व
र इति श्रुतेः द्विर्वचनं समाप्तिं द्योतयति ओंकारस्य मंगलार्थः ओंकारश्चाथशब्दश्च द्वावे
तौ ब्रह्मणः पुरा कंठं भित्वा विनिर्यातौ तस्मान्मांगलिकावुभौ इति वचनात् अंते नमस्का
परिचरणं कृतवान भविष्यं तेन नम उक्तिं विधेम इति श्रुतेः धनं तदेव लभते न च ततश्च तेन देवा
पुणमहः करणस्य च सामर्थ्यं हि हरिर्येन प्राह नमस्क्रियते मायाभिनुपलक्षणं एकोपि कृष्ण ५३

सत्कृतः आणमोद शाश्वमेधावभृथेन तत्स्यः दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भ
वाय अतसीपुष्पसंकाशं पीतवाससमच्युतं ये नमस्यंति गोविंदं न तेषां विद्यते भयं त्रैलोक्याधि
पतिं प्रतिमप्रभावमीशं प्रणम्य शिरसा प्रभुविष्णुमीशं जन्मांतरप्रलयकल्पसहस्रजात
मास्तु प्रनाशमुपयाति नरस्य पापं १०० । १२० इति नाम्नां दशशतानि विततम् सलिलः शार्ङ्गि
गः वीतभयः पीतवस्त्रितः अनादिः धाता प्रणाम्य तयज्ञः यज्ञात तस्मात् तस्मिन्नीशः १ इतीदं की
र्तनीयस्य केशवस्य महात्मनः नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितं १२। इतीदमित्यने
न नामसहस्रमनन्तनाधिकमन्त्रमिति दर्शयति दिव्यानाम प्राकृतानां नाम्नां सहस्रं कीर्तितं।
मिति वदता प्रकारांतरेणापि सर्वोपपत्तिर्दर्शिता ।२। यदृक्षरं पदं यानि तु पक्ष्माणि परिकी
र्तयेत् नाम्नां भंशमनुयाति विनश्यत्सु हृदमानवः १२२ महत्त्वमेविं जपस्य च्यतेजन्तरितिजपश
ब्दोपादानात् कीर्तये दिमनेनापि त्रिविधोजपो लक्ष्यते परलोकं गतस्यापि यथा तिनहृषादि
वत्स्वभमायास्वभावस्य च पितृमसमत्वेन्यं १२२ वेदांतगो ब्राह्मणः स्यात् क्षत्रियो विजयी भवेत्।
वैश्यो धनसमृद्धः स्यात् शूद्रः सुखमवाप्नुयात् १२३ वेदांतानाम उपनिषदाम पर्यं ब्रह्म गच्छतीति वेदां

स.टी. नतः किंच पच्यते जन्तुर्जन्मसंसारबंधनात् इति वचनात् जपकर्मणः साक्षान्मुक्तिः शंकायां कर्म
५८ णः साक्षान्मोक्षहेतुत्वं नास्ति ज्ञानेनैव मोक्षं दर्शयति वेदांतगो ब्राह्मणः स्यादित्युक्तं कर्मणैनः
54 सत्त्वशुद्धिद्वारा मोक्षहेतुत्वं कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः कषाये कर्मभिः पक्वे त
तो ज्ञानं प्रवर्तते नित्यैर्ज्ञानं समासाद्य नरो वधात्प्रमुच्यते धर्मास्तत्वं च ज्ञानं च ज्ञानान्मोक्षोऽ
धिगम्यते योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये कर्मणा बध्यते जंतुर्विद्यया च विमुच्यते
तस्मात्कर्म न कुर्वंति यतयः पारदर्शिनः यैर्वाक्यान्यपि कर्माणि परिहाय द्विजोत्तमः आत्मज्ञा
ने शमे च स्याद्वेदाभ्यासे च यत्नवान् तपसा कल्मषं हंति विद्ययामृतमश्नुते ज्ञानमुत्पद्यते पुंसां
क्षयात्पापस्य कर्मणः यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि इत्यादिस्मृतिभ्यः तमेतं वेदानुव
चनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेनेति येन केन जतोपि दर्विहोमेन
श्रतपहतमना भवतीत्यादिश्रुतिभ्यश्च ज्ञानादेव मोक्षः ब्रह्मविदाप्नोति परं तरति शोकमात्म
वित् ब्रह्म वेद ब्रह्मैव भवति ब्रह्मैव सन् ब्रह्माप्येति तमेव विदित्वातिमृत्युमेति नान्यः पंथाः विद्य
तेऽयनाय आनंदं ब्रह्मणो विद्वान् न बिभेति कुतश्चन इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्म ५८

हतीविनस्थिः यदाचर्मवदाकाशंवेष्टयिष्यंति मानवाः तदादेवमविज्ञाय दुःखस्यांतोभविष्यतिः
कर्मणानप्रजयाधनेनत्यागेनैकेअमृतत्वमानशुः वेदांतविज्ञानसुनिश्चितार्थाः सं
न्यासयोगाद्यतयःशुद्धसत्वाः तेब्रह्मलोकेषुपरांतकालेपरामृतात्परिमुच्यंतिसर्वइत्यादिश्रु
तिभ्यः स्मृतेः सुखमाप्नुयात्श्रवणेनैवनतुजपयज्ञेननस्मात्स्मृत्यायज्ञेनवक्तानरइतिस्मृतेः
श्रावयेच्चनरोवर्णांनेतिनिर्भारतादिषुश्रवणमनज्ञायते सगतिमिपाठश्रवणाच्चस्मृद्धयो
रितितद्विशेषः १२३ धर्मार्थीप्राप्नुयाद्धर्ममर्थार्थीचार्थमाप्नुयात् कामानवाप्नुयात्का
मीप्रजार्थीचाप्नुयात्प्रजाः १२४ भक्तिमान्यःसदोत्थायशुचिस्तद्गतमानसः सहस्रंवासुदेव
स्यनाम्नामेतत्प्रकीर्तयेत् १२५ भक्तिमानित्यादिनाभक्तिमतःशुचेःसततमनुष्ठातुःसैकाग्र
चित्तस्यश्रद्धालोर्विशिष्टाधिकारिणःफलविशेषदर्शयति १२५ यशःप्राप्नोतिविपुलंज्ञातिप्रा
न्यमेवच अचलांश्रियमाप्नोतिश्रेयःप्राप्नोत्यनुत्तमं १२६ नभयंक्वचिदाप्नोतिवीर्यंतेजश्च
विंदति भवत्यरोगोद्युतिमान्बलरूपगुणान्वितः १२७ रोगार्तोमुच्यतेरोगाद्बद्धोमुच्येत
बंधनात् भयान्मुच्येतभीतस्तुमुच्येतापन्नआपदः १२८ दुर्गाण्यतितरत्याशुपुरुषःपुरुषो

नेमं स्तवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ॥११९॥ वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः सर्वपा
पविशुद्धात्मा याति ब्रह्म सनातनं १२० न वासुदेवभक्तानामशुभं विद्यते क्वचित् जन्ममृत्युजरा
व्याधिभयं नैवोपजायते १२१ इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः युज्येतात्मसुखक्षान्ति श्रीधृति
स्मृतिकीर्तिभिः १२२ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः भवंति कृतपुण्यानां भक्तानां पु
रुषोत्तमे १२२ न क्रोधो न लोभो नाशुभा मतिर्न कारानुबंधरहितेन नकारेण समस्तपदत्रयं क्रोधा
दयो भवंति मात्सर्यं न भवतीत्यर्थः १२३ द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः वासुदेवस्य
वीर्येण विधृतानि महात्मनः १२४ द्यौः सचन्द्रार्कनक्षत्रेत्यादिना तु तस्य श्रीवासुदेवस्य
माहात्म्यकथनेनोक्तानां फलानां प्राप्तिवचनं यथार्थकथनं नादः इति दर्शयति १२४ ससुरासुर
गंधर्वं सयक्षोरगराक्षसं जगद्वशे वर्ततेदं कृष्णस्य सचराचरं १२५ इंद्रियाणि मनो बुद्धिः सत्त्वं तेजो
बलं धृतिः वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च १२६ सर्वागमानामाचारः प्रथमं परिकल्पते
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः १२७ सर्वागमानामाचार इत्यनेन तु अर्थान्तरवाक्येन सर्वधर्माणा
माचारवत्त्वाधिकारं दर्शयति १२७ ऋषयः पितरो देवाः महाभूतानि धातवः जंगमाजंगमं चेदं ज

सटी-
५६
56

गन्नारायणोद्भवं १३८ योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादिकर्म च वेदाः शास्त्राणि विज्ञानमेतत्सर्वं ज
नार्दनात् १३९ एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः त्रीँल्लोकान्व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः
१४० इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितं पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च १४१ इमं स्त
वमित्यादिना सहस्रशाखाज्ञेन सर्वज्ञेन भगवता कृष्णद्वैपायनेन साक्षान्नारायणेन कृतमिति श्रे
योर्थिभिः सादरं पठितव्यं सर्वफलसिद्धये इति दर्शयति १४१ विश्वेश्वरमजं देवं जगतः प्रभवाप्यय
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवं १४२ इति श्रीविष्णुसहस्रनामस्तोत्रं समाप्तम् विश्वेश्वरमि
त्यादिना विश्वेश्वरोपासनाद्देवस्तोतारस्ते धन्याः कृतार्थाः कृतकृत्याः इति दर्शयति १४३ प्रमादात्कु
र्वतां कर्म प्रच्यवेताध्वरेषु यत् स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः सहस्रनामस्तवं विष्णोः
सर्वसौख्यावहं श्रुतिस्मृतिन्यायकलापरचिताद्धरिपादयोः इति श्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीशंक
राचार्यकृतं सहस्रनामविवरणं टीकासहितं समाप्तम् शुभमस्तु यादृशं पुस्तकं दृष्ट्वा तादृशं
लिखितं मया यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ मिति फाल्गुण शुदि षष्ठ्यां ... रविवासरायां
लिखितेन मया पण्डितकाश्मीरेण श्रीहित ... पुस्तकं समाप्तम् स्वपठनार्थं श्रीरामब्रह्मणा ... ॥ ५६